यासामुर्ज्जित-वैरि-भू-प्रविगलद्दानाम्वु(म्बु)-पानोल्लस-
न्माद्यद्भृङ्ग-करीन्द्र-कुम्भ-दलन-प्राप्त-श्रियां भूभुजाम् ।
नालन्दा
6. सतीव सर्व्वनगरीः शुभ्राभ्र-गौर-स्फुर-
च्चैत्यांशु-प्रकरीस्सदागम-कला-विख्यात-विद्वज्जना ॥ 4
यस्यामम्वु(म्बु)धरावलेहि-शिखर-श्रेणीवि-
7. हारावली
मालेवोर्ध्व-विराजिनी विरचिता धात्रा मनोज्ञा भुवः (।*)
नाना-रत्न-मयूख-जाल-खचित-प्रासाद-देवालया
सद्विद्याधर-सङ्घ-
8. रम्य-वसतिर्धत्ते सुमेरोः श्रियम् ॥ 5
अत्रास[ह्य]-पराक्रम-प्रणयिना जित्वाखिलान्विद्विषो
वा(बा)लादित्य-महानृपेन सकलम्भुक्त्वा च भू-मण्डलम् (।*)
9. प्रासादः सुमहानयं भगवतः शौद्धोदनेरद्भुतः
कैलासाभिभवेच्छयेव धवलो मन्ये समुत्थापितः ॥ 6
अपि च ॥

न्यक्कुर्व्वन्निन्दु-कान्तिस्तुहिन-गि-
10. रि-शिरः-श्रेणि-शोभान्निरस्यन्
शुभ्रामाकाशगङ्गान्तदनु मलिनयन्मूकयन्वादिसिन्धून् ।
मन्ये जेतव्य-शून्ये भुवन इह वृथा भ्रान्तिरित्याक-
11. लय्य
भ्रान्त्वा क्षौणीमशेषाञ्जित-विपुलयशस्स्तम्भ उच्चैस्स्थितो वा ।। 7
अत्रादायि निवेद्यमाज्य-दधिमद्दीपस्तथा भासुर-
श्चातुर्ज्जातिक-रेणु-मिश्रममल-
12. न्तोयं सुधा-शीतलं(लम्) ।
साध्वी चाक्षयनीविका भगवते वु(बु)द्धाय शुद्धात्मने
मालादेन यथोक्त-वंश-यशसा तेनातिभक्तया स्वयं(यम्) ।। 8
आदेशात्स्फीत-शील-श्रुत- धवल-धि-
13. यो भिक्षु-सङ्घस्य भूयो
दत्तन्तेनैव सम्यग्व(ग्ब)हु-घृतदधिभिर्व्यञ्जनैर्युक्तमन्नं(न्नम्)[4] ।
भिक्षुभ्यस्तच्चतुर्भ्यो व(ब)हु-सुरभि-चतुर्जातकामोदि नित्यं
तोयं स[त्त्रे] विभक्तं पुनरपि
14. विमलं भिक्षु-सङ्घाय दत्तम् ।। 9
तेनैवाद्भुतकर्मणा निजमिह क्रीत्वा[यं]-सङ्घान्तिका-
न्मुक्त्वा चीवरिकां प्रदाय विधिना सामान्यमेकन्तथा ।
कालम्प्रेरयितुं सुखे-
15. न लयनन्दत्तं स्वदेशम्विना[5]
तेभ्यो नर्द्दरिकावधेश्च परतः शाक्यात्मजेभ्यः पुनः ।। 10
दानं यदेतदमलङ्गुणशालि-भिक्षु-
पूर्ण्णेन्द्रसेन-वचन-प्रतिवो(बो)धितेन ।
तेन प्रतीत-
16. यशसा भुवि निर्म्मलाया
भ्रात्रा व्यधायि शरदिन्दुनिभाननायाः ।। 11
पित्रोर्भ्रातुः कलत्र-स्वसृ -सुत-सुहृदान्तस्य धर्म्मैकधाम्नो
दत्तं दानं यदेतत्सकलमतिरसेनायुरा-
17. रोग्य-हेतोः ।
सर्व्वेषाञ्जन्मभाजां भव-भय-जलधेः पारसंतारणार्थं
श्रीमत्सम्वो(म्बो)धि-कल्पद्रुम-विपुल-फल-प्राप्तये चानुमोद्यम् ।। 12
चन्द्रो यावच्चकास्ति स्फुरदुरुकिरणो लो-

18. क-दीपश्च भास्वान्
एषा यावच्च धात्री स-जलधि-वलया द्यौश्च दत्तावकाशा ।
यावच्चैते महान्तो भुवन-भर-धुरान्धारयन्तो महीध्रा-
स्तावच्चन्द्रावदाता धवलयतु दिशाम्म-
19. ण्डलं कीर्त्तिरेषा ॥ 13
यो दानस्यास्य कश्चित्कृतजगदवधेरन्तरायं विदध्या-
त्साक्षाद्वज्रासनस्थो जिन इह भगवानन्तरस्थः सदास्ते ।
वा(बा)लादित्येन राज्ञा प्रदलित-रि-
20. पुणा स्थापितश्चैष शास्ता
पञ्चानन्त[र्यं]कर्त्तुर्ग्गतिमतिविषमान्धर्म-हीनः स यायात् ॥ 14
इत्येवं शीलचन्द्र-प्रथित-करणिक-स्वामिदत्तावलङ्घ्यां
संङ्घाज्ञां[6] मूर्ध्नि कृत्वा श्रुतलव-
21. विभवावप्यनालोच्य भारं(रम्) ।
हृद्यामेतामुदारां त्वरितमकुरुतामप्रपञ्चां प्रशस्तिं
वाञ्छेतां किन्न पंगू शिखरि-तरु-फलावाप्तिमुच्चैः करेण ॥ 15

---

1. From the facsimile in *Ep. Ind.*, XX.
2. Symbol for *siddham*.
3. *B* has been throughout indicated by the sign for *v*.
4. A superscript *r* was originally engraved above *ma*; but it is partially erased.
5. Read *svadeśaṁ vinā*. Out of the land granted to the Saṅgha, one was kept by the donor for himself (*sva-deśa*) and another for the purpose of bestowing *chīvaras* to the monks annually (*chīvarikā*).
6. Read *saṅgh-ājñāṁ*.

E—The Gurjara-Pratihāras

No. 8—Barah Copper-plate Inscription of Bhoja I, [Vikrama] year 893 (836 A.D.)

Barah, Kanpur District, U.P.
Hirananda Sastri, *Ep. Ind.*, XIX, pp. 17-18.

Language : Sanskrit.
Script : Siddhamātṛikā.
Metre : V. 1 अनुष्टुभ्

Summary : For genealogy, see under the Partābgaḍh stone inscription of Mahendrapāla II below.—King Bhoja I informed all the officers and residents of the Valāk-āgrahāra belonging to the Udumbara District in the Kālañjara division of the province of Kanyakubja that the grant of the said *agrahāra*, which was originally made by [Maukhari] Śarvavarman and sanctioned by *Mahārāja* Nāgabhaṭa [II], was disturbed for sometime owing to the incapacity of the *Vyavahāriṇs* (administrative officers) during the reign of Rāmabhadra, and that the *agrahāra* was donated together with all its income to the Brāhmaṇas born of the family of Bhaṭṭa-Kācharasvāmin of the Bharadvāja-gotra and Vājasaneya-śākhā after having withdrawn the obstruction in the enjoyment of the grant.—Bālāditya, son of Rājya-bhaṭṭārikā, was the *Dūtaka* (executor) of the *śāsana* (grant), which was brought into force by Rudraṭa. The charter was issued on the 5th day of the bright fortnight of Kārttika in [Vikrama] Saṁvat 893 (836 a.d.)

TEXT[1]

1. १ॅ[2] स्वस्ति । श्री-महोदय-समावासितानेक-नौ-हस्त्यश्व-रथ-पत्ति-सम्पन्न-स्कन्धावारात्परमवैष्णवो
2. महाराज-श्री-देवशक्तिदेवस्तस्य पुत्त्रस्तत्पादानुध्यातः श्री-भूयिका-देव्यामुत्पन्नः परममाहेश्वरो

3. महाराज-श्री-[व]त्सराजदेवस्तस्य पुत्त्रस्तत्पादानुध्यातः श्री-सुन्दरी-
देव्यामुत्पन्नः परम्भगवती[3]-भक्तो

4. महाराज-श्री-[ना]गभटदेवस्तस्य पुत्त्रस्तत्पादानुध्यातः श्रीमदीसटा-
देव्यामुत्पन्नः परमादित्यभक्तो

5. महाराज-श्री-रामभद्रदेवस्तस्य पुत्त्रस्तत्पादानुध्यातःश्रीमदप्पादेव्यामुत्पन्नः
परम्भगव-[3]

6. ती-भक्तो महाराज-श्री-भोजदेवः ॥[4] श्री-कन्यकुव्ज(ब्ज)-[5]भुक्तौ ।[4] श्री-
कालञ्जर-मण्डलान्त-

7. ⌣ पाति-उ(त्यु)दुम्व(म्ब)र - विषय - सम्व(म्ब)द्ध-वलाकाग्रहारे
समुपगतान्सर्व्वानिव यथास्था-

8. न-नियुक्तान्प्रतिवासिनश्च समाज्ञापयति। उपरिलिखिताग्रहारस्स-

9. र्व्वायसमेत आ-चन्द्रार्क्कक्षितिकालम्पूर्व्व-दत्त-देवव्र(ब्र)ह्मदेयवर्ज्जितः
परमेश्वर-श्री-

10. शर्व्ववर्म्मदेव-शासनं ।[4] महाराज-श्री-नागभटदेवानुमतिञ्च दृष्ट्वा
भोगञ्च महा-

11. राज-श्री-रामभद्रदेवराज्ये व्यवहारिणो वैगुण्यात्किञ्चित्कालम्विहतं[7]
ज्ञात्वा म-

12. या पित्रो⌣पुण्याभिवृद्धये ।[4] भरद्वाज-सगोत्त्र-वाजसनेय-सव्र(ब्र)ह्मचारि-
भट्ट-काच-

13. रस्वाम्यन्वयज-व्र(ब्रा)ह्मणानामन्तरा विच्छेदमप्रमाणीकृत्य प्राग्भागक्रमेणै-

14. वोत्सङ्कलित इति विदित्वा भवद्भिस्समनुमन्तव्यः प्रतिवासिभिरप्याज्ञा-
श्रवण-विधेयै[र्भु त्वा] [स]र्वा-

15. या एषाम्स[8]मुपनेया इति ॥
रुद्रटेन प्रयुक्तस्य शासनस्य स्थिरायतेः ।
दूतको वा(बा)लादि-

16. त्यो(ऽ*)त्त्र राज्यभट्टारिका-सुतः ॥ 1
सम्व[9] १००(×*)८(+*)६०(+*)३[10] कार्त्तिक-शुदि ५ निवद्ध-
(बद्धम्) ।

---

1. From the facsimile in *Ep. Ind.*, XIX.
2. Symbol for *siddham* or *Oṁ siddhiḥ*.
3. Better read *parama-bhagavatī*
4. The sign of punctuation is unnecessary.
5. The sign for *v* has throughout been used for both *v* and *b*.

6. This king has been identified by Sastri with *Mahārāja* Śarva whose kingdom, according to the evidence of the Sanjan plates of Amoghavarsha I, lay on the northern bank of the Narmadā at the foot of the Vindhyas. It is better, however, to identify the king with the Maukhari ruler Śarvavarman. See *Ep. Ind.*, XXIII, p. 243.

7. Read *kālaṁ vihataṁ.*

8. Read *eshāṁ samupa°*.

9. Read *saṁvat*. Sastri, who thinks that the final *t* after *samva* is to be read in the figure for 100, may not be wrong.

10. I.e. Vikrama 893=836 A.D.

No. 9—Jodhpur Stone Inscription of Bāuka

(Feudatory of Bhoja I), Vikrama 894 (837 A.D.)

Jodhpur,[1] Jodhpur Division, Rājasthān.
Munshi Debiprasad, *JRAS*, 1894, pp. 1ff.; R.C. Majumdar, *Ep. Ind.*, XVIII, pp. 95ff.

Language : Sanskrit
Script : Siddhamātṛikā
Metres : V.1-26 *Anushṭubh*; V. 27-28 *Sragdharā*; V. 29 *Āryā*; V. 30 *Śārdūlavikriḍita*; V. 31 *Mālinī*.

Summary : There was a Brāhmaṇa named Harichandra Rohilladdhi. The sons born of his Brāhmaṇa wife became the Pratihāra Brāhmaṇas while the sons born of his Kshatriya wife Bhadrā were known as the Kshatriya Pratihāras. Four sons were born to Bhadrā, viz. Bhogabhaṭa, Kakka, Rajjila and Dadda. They conquered the fort of Māṇḍavyapura (Mandor near Jodhpur). From Rajjila was born Narabhaṭa *alias* Pallāpelli. His son Nāgabhaṭa had his capital at Meḍāntaka (Medta about 70 miles to the north-east of Jodhpur). His wife Jajjikādevī gave birth to two sons, viz. Tāta and Bhoja Tāta, conferred the kingdom on his younger brother Bhoja and retired to the hermitage of Māṇḍavya. Tāta's son was Yaśovardhana. To Yaśovardhana was born Chanduka. His son Śīluka fixed a perpetual boundary between the Stravaṇī and Valla countries, knocked down Bhaṭṭika (Bhāṭi) Devarāja of Valla, had a tank excavated, a city established and the temple of Siddheśvara Mahādeva constructed at Tretā. Śīluka's son Jhoṭa gave up the throne and proceeded to the Bhāgīrathī. His young son Bhillāditya governed the kingdom, and, then bestowing it on his son Kakka, proceeded to Gaṅgādvāra where he stayed for eighteen years and went to heaven by practising fast. Kakka fought with the Gauḍas at Mudgagiri (Monghyr, Bihar). His wife Padminī of the Bhaṭṭi (Bhāṭi) clan gave birth to Bāuka. Having found his enemy gone to BHŪAKŪPA after killing NANDĀVALLA, while the Pratihāra prince's authority over other kings was destroyed, his own younger brothers and ministers left him and his army on all sides was seized with terror, the illustrious Bāuka suddenly dispersed the newly formed confederation of the enemies and killed MAYŪRA. The inscription, engraved by KṚISHṆEŚVARA, son of the goldsmith Vishṇuravi, was dated in the [VIKRAMA] YEAR 894 (838 A.D.), in the month of CHAITRA, on the 5H DAY of the BRIGHT FORTNIGHT.

TEXT[2]

1. १ँ नमो विष्णवे ।।
य[स्मिन्विश]न्ति भूतानि यतस्सर्ग्ग-स्थिती मते ।
स व‿पायाद्धृषीकेशो निर्ग्गुणस्सगुणश्च यः ।। 1
गुणा‿पूर्व्वं पूरुषाणां[3] की[र्त्यन्ते] तेन[4]
2. पण्डितैः ।
गुणकीर्त्तिरनश्यन्ती स्वर्ग्गवासकरी यतः ।।[5] 2
अतः श्री-वा(बा)उको धीमां[6] स्व-प्रतीहार-वंशजां[7] ।
प्रशस्तौ लेखयामास श्री-यशो-विक्क्रमान्वितान् ।। 3
स्व-भ्रात्रा रा-
3. मभद्रस्य प्रतिहार्यं कृतं यतः ।
श्री-प्रत्तिहार-वङशो[8](ऽ*)यमतश्चोन्नतिमाप्नुय(ा*)त् ।। 4
विप्रः श्री-हरिचन्द्राख्य‿पत्नी भद्रा च क्षत्त्रिया[9] ।
ताभ्यान्तु [ये][सु]ता जाताः [प्रतिहा]रांश्च तान्वि-
4. दुः ।। 5
व(ब)भूव रोहिल्लद्ध्यङ्को वेदशास्त्रार्त्थ-पारगः ।
द्विजः श्री-हरिचन्द्राख्यः प्रजापति-समो गुरुः ।। 6
तेन श्री-हरिचन्द्रेण परिणीता द्विजात्मजा ।
[द्वि]तीया क्षत्त्रि-
5. या[10] भद्रा महाकुल-गुणान्विता ।। 7
प्रतीहारा द्विजा भूता व्रा(ब्रा)ह्मण्यां ये(ऽ*)भवंत्[11] सुताः ।
राज्ञी भद्रा च यां[12] त्सूते ते भूता मधुपायिनः ।। 8
चत्वार[श्च]ात्मजास्तस्यां जाता भू-धरण-क्ष-

6. मा: ।
श्रीमान्भोगभटः कक्को रज्जिलो दद्द एव च ।। 9
माण्डव्यपुर-दुर्ग्गे(ऽ*)स्मिन्नेभिर्न्निजभुजार्ज्जिते ।
प्राकारः कारितस्तुङ्गो विद्विषां भीति-वर्द्धनः ।। 10
अमीषां रज्जिलाज्जातः
7. श्रीमान्नरभटः सुतः ।
पेल्लापेल्लीति नामाभूद्द्वि[तीयं] तस्य विक्क्रमैः ।। 11
तस्मा[न्नरभ]टाज्जातः श्रीमान्नागभटः शुतः[13] ।
राजधानी स्थिरा यस्य महन्मेडान्तकं पुरं(रम्) ।। 12
राज्ञ्यां श्री-
8. जज्जिकादेव्यास्ततो[14] जातौ महागुणौ ।
द्वौ सुतौ तात-भोजाख्यौ सौर्दयौ[15] रिपुमर्द्दनौ ।। 13
तातेन तेन लोकस्य विद्युच्चंचल-जीवितं(तम्)[16] ।
वु(बु)ध्वा[17] राज्यं लघोर्भ्रातु(:*) श्री-भोज-
9. स्य समर्प्पितं(तम्) ।। 14
स्वयंञ्च[18] संस्थितस्तात(:*) शुद्धं धर्म्म(ं*) समाचरन् ।
माण्डव्यस्याश्रमे पुण्ये नदी-निर्ज्झर-शोभिते ।। 15
श्री-यशोवर्द्धनस्तस्मात्पुत्त्रो विख्यात-पौरुषः ।
भूतो नि[ज]-
10. भुज-ख्यातिः समस्त्तोद्धृत-कण्टकः ।। 16
तस्माच्च चन्दुकः श्रीमान्पुत्त्रो(ऽ*)भूत्पृथु-विक्क्रमः ।
तेजस्वी त्यागशीलश्च विद्विषां युधि दुर्द्धरः ।। 17
ततः श्री-शिलुको जातः पुत्त्रो दुर्व्वार-विक्क्रमः ।
येन
11. सीमा कृता नित्या स्त्रवणी-त्रल्ल-देशयोः ।। 18
भट्टिकं देवराजं यो वल्लमण्डल-पालकं:[19] ।
नि[पा]त्य त[त्क्ष]णं भूमौ प्राप्तवान् च्छत्त्र-चिह्नकं:[20] ।। 19
पुष्करिणी कारिता येन[21] त्त्रेतः-तीर्थे च पत्तनं(नम्) ।
सि-
12. द्धेश्वरो महादेवः कारितस्तुङ्ग-मन्दिरः ।। 20
ततः श्री-शीलुकाज्जातः[22] श्रीमान्झोटो वरः सुतः ।
येन राज्य-सुखं भुङ्क्त्वा[23] भागीर[थ्यां] कृता गतिः ।। 21
व(ब)भूव सत्व(त्त्व)वान्तस्माद्भिल्लादित्यस्तपो-म-

13. तिः ।
यूना राज्यं कृतं येन पुनः पुत्त्राय दत्तव(ा*)न् ।। 22
गङ्गाद्वारं ततो [गत्वा] वर्षाण्यष्टादश स्थितः ।
अन्ते चानशनं कृत्वा स्वर्ग्गलोकं समागतः ।। 23
ततो(ऽ*)पि श्रीयुतः कक्कः
14. पुत्त्रो जातो महामतिः ।
यशो मुद्गगिरौ लव्धं(ब्धं) येन गौडै(ः*) समं रणे ।। 24
[छन्दो] व्याकरणं तर्कको ज्योतिः-शास्त्रं कलान्वितं(तम्) ।
सर्व्व-भाषा-कवित्वञ्च विज्ञातं सुविचक्षणं(णम्) ।। 25
[भट्टि]-व-
15. ङ्श-विशुधायां[24] तदस्मात्कक्क-भूपतेः ।
श्रीमत्पद्मिन्याः[25] महाराज्ञ्या जातः श्री-वा(बा)उक(ः*)
सुतज्ज्ञइति[26] ।। 26
नन्दावल्लं प्रहत्वा[27] रिपु-व(ब)लमतुलं भूअकूप-प्रयातं
दृष्ट्वा भ-
16. ग्नां[28] स्वपक्ष[ां]द्विज-नृपकुलजां सत्प्रतीहार-भूपां ।
धिग्भूतैकेन तस्मिन्प्रकटित-यशसा श्रीमता वा(बा)उकेन ।[29]
स्फूर्जन्हत्वा[30] मयूरं तदनु नरमृगा घातिता हे-
17. [ति]नैव ।। 27
कस्यान्यस्य प्रभग्नः[31] ससचिवमनुजं त्यज्य[32] राणासु तंत्रः[33] ।
केनैकेनातिभीते दशदिशि तु व(ब)ले स्तम्भ्य[34] चात्मानमेकं(कम्) ।
धैर्या[न्मु]क्त्वाश्वपृष्ठं क्षिति-ग-
18. त-चरणेनासिहस्तेन शत्रुं
छित्वा भित्वा[35] श्मशानं कृतमति[भ]यदं वा(बा)उकान्येन तस्मिन् ।। 28
नवमण्डल-नवनिचये भग्ने हत्वा मयूरमतिगहने ।
तदनु
19. भृतासि-तरंगा श्रीमद्व(द्वा)उक-नृ-सिंघेन[36](।।*) 29
सार्द्धार्द्धं‿प्रग[ल]द्भि रक्त[37]-सुषिरैर्व्वा(र्ब्बा)हूरु-पादाङ्ककै-
रेन्त्रै[38]श्चोपरिलम्बितै विरचितं शवगृहं[39] फेत्का[ा]र-सत्वा(त्त्वा)कुलं-
(लम्) ।
20. यच्छ्री-व.(बा)उक-मण्ड[ल]ाग्र-रचितं प्राक्छत्रु-संघाकुले
तत्संस्मृत्य न कस्य सम्प्रति भवेत्त्रासोद्गमश्चेतसि ।।* 30
ननु सम(र*)-धरायां वा(बा)उके नृत्यमाने
शव-तनु-

21 शकलान्त्रेष्वेव विन्यस्त-पादे ।
शममिव हि गतास्ते तिष्ठ-तिष्ठेति गीता-
न्ढूय-गत-नृ[कु]रङ्गाश्चित्रमेतत्तदासीत् ॥[40] 31
सं ८९४ चैत्त्र-शु-दि ५[41] (॥*)
22. उत्कीर्ण्णा च हेमकार-विष्णुरवि-[सू]नुना कृष्णेश्वरेण ॥

---

1. It has been suggested that the inscribed stone, discovered about 1892 in the wall surrounding the city of Jodhpur, had been brought there from Mandor, 5 miles to the north of the city.

2. From the facsimile in *Ep. Ind.*, XVIII.

3. Written *puru*° in classical Sanskrit.

4. The *akshara na* of *tena* looks like *nṛi*. May be *te nṛi*°.

5. The metre is faulty in the short sixth syllable of the first *pāda*. *Pūrva-purushāṇāṁ* seems to be better than *pūrvaṁ purushāṇāṁ*.

6. Read *dhīmān*.

7. Read *vaṁśajān*.

8. Read *Pratīhāra-vaṁśo*.

9-10. Read *kshatriyā*.

11. Read °*bhavan=sutāḥ* or *bhavant*°.

12. Read *yān=sūte* or *yānt*°.

13. Read *sutaḥ*.

14. Read °*n=tato*.

15. Read *sodaryau*.

16. Read *jīvitam*.

17. Read *buddhvā*.

18. Read *svayañ=cha*.

19. Read *pālakam*.

20. Read *chihnakam*.

21. The metre is faulty in having one syllable in excess in the *pāda*. Better read *kṛitā* meaning *kāritā*, it being *antarbhūta-ṇyartha*.

22. It is interesting to note that the name *Śīluka* is spelt as *Śiluka* in l. 10 of this record.

23. Read *bhuktvā*.

24. Read *vaṁśa-viśuddhāyās*°.

25. The metre is faulty in having one syllable in excess in the *pāda*. Better read *śrī-Padminyāḥ*.

26. It has been suggested that the *praśasti* originally ended here.

27. Read *cha hatvā*.

28. Read *bhagnān sva-pakshān dvija-nṛipa-kulajān sat-Pratīhāra-bhūpān*.

29. The *daṇḍa* is unnecessary.

30. *Sphūrjan* has to be corrected to *sphūrjatā* which, however, offends against the metre.

31. Read *prabhagnaṁ*.

32. One has to read *tyaktvā rāṇāsu tanttram* which offends against the metre.

33. Ths *daṇḍa* is unnecessary.

34. Correctly *stambhayitvā* which, however, spoils the metre.

35. Read *chhittvā bhittvā*.

36. Read *siṁhena*. The verb of the subject has, however, to be supplied. Majumdar suggests *senā hatā*.

37. Read *pragalad-virakta*°.

38. Read °*r=āntrai*°.

39. Read °*lambitaiḥ śavagṛihaṁ* and omit *virachitaṁ*.

40. There is the figure of a wheel here. Perhaps it represents the *Vishṇu-chakra*.

41. There is a figure of conch here. It is also a Vaishṇava emblem.

No. 10—Gwalior Stone Inscription of Bhoja I
(c. 836-85 A.D.)

SĀGAR TĀL, near Gwalior, Gird District, Madhya Pradesh
Hirananda Sastri, *Arch. Surv. Ind.*, 1903-04, pp. 277ff.; Kielhorn, *Nachrichten von der Königlichen Gesellschaft der Wissenschaften zu Göttingen*, pp. 300-04.; R. C. Majumdar, *Ep. Ind.*, XVIII, pp. 107ff.

Language : Sanskrit
Script : Siddhamātṛikā.

Metres: V.1 वसन्ततिलक; V.2 शार्दूलविक्रीडित; V.3 स्रग्धरा; V.4 शार्दूलविक्रीडित; Vv. 5-6 स्रग्धरा; V.7 शार्दूलविक्रीडित; Vv.8-11 वसन्ततिलक; V.12 स्रग्धरा; Vv.13-14 अनुष्टुभ्(श्लोक); V.15 उपजाति; V.16 अनुष्टुभ्(श्लोक); V.17 शिखरिणी; Vv.18-19 शार्दूलविक्रीडित; V.20 हरिणी; Vv.22-23 अनुष्टुभ्(श्लोक); V.26 वसन्ततिलक; V.27 स्रग्धरा.

Summary : In the lineage of the SUN was born NĀGABHAṬA (I) who crushed the MLECHCHHA king. His brother's son KĀKUSTHA (Kākutstha) *alias* KAKKUKA was a paramount king. His younger brother, who had succeeded him, subdued a multitude of kings. His son VATSARĀJA seized the empire from the BHAṆḌI(Bhaṭṭi or Bhāṭi) clan. His son NĀGABHAṬA II subdued the kings of ANDHRA, SINDHU, VIDARBHA and KALIṄGA, vanquished CHAKRĀYUDHA and the lord of VAṄGA (Dharmapāla), and occupied the hillforts of the kings of ĀNARTA, MĀLAVA, KIRĀTA, TURUSHKA, VATSA and MATSYA. Meditating on his feet was RĀMABHADRA. His son and successor MIHIRA *alias* BHOJA I defeated DHARMA'S SON (Devapāla). Bhoja erected a house for the god NARAKADVISH (Vishṇu) within his seraglio compound.—The composer of the *praśasti* was BĀLĀDITYA, son of Bhaṭṭa Dhanneka.

TEXT[1]

1. १ँ[2] नमो विष्णवे ॥
शेषाहि-तल्प-धवलाधर-भाग-भासि-

वक्षःस्थलोल्लसित-कौस्तुभ-कान्ति-शोणं(णम्) ।
श्यामं वपु(:*) शशि-विरोचन-विम्व-चुम्वि-[3]
व्योम-प्रकाशमवतान्नरक-द्विषो वः ।। 1
आत्माराम-फलादुपार्ज्य विजरं देवेन दैत्य-द्विषा
ज्योतिर्व्वीजमकृत्त्रिमे

2. गुणव[ि]त क्षेत्त्रे यदुप्तं पुरा ।
श्रेयः-कन्द-वपुस्ततस्समभवद्भास्वानतश्चापरे
मन्विक्ष्वाकु-ककुस्थ[4]-मूल-पृथवः क्ष्मापाल-कल्प-[द्द्रु]माः ।। 2
तेषां वंशे सुजन्मा क्रम-निहित-पदे धाम्नि वज्रे षुघोरं
रामः पौलस्त्य-हिन्श्रं[5] क्षत-विहति-समित्कर्म्म चक्रे पलाशैः ।
श्लाघ्य-

3. स्तस्यानुजो(ऽ*)सौ मघव-मद-मुषो मेघनादस्य संख्ये
सौमित्त्रिस्तीव्र-दण्डः प्रतिहरण-विधेर्यः प्रतीहार आसीत् ।। 3
तद्वन्शे[6] प्रतिहार-केतन-भृति त्त्रैलोक्य-रक्षास्पदे
देवो नागभटः पुरातन-मुनेर्मू र्त्ति[7]र्व्वं(र्ब्बं)भूवाद्भुतं(तम्) ।
येनासौ सुकृत-प्रमाथि-व(ब)लव[8]न्म्लेच्छा-

4. धिपाक्षौहिणीः
क्षुन्दान स्फुरदुग्र-हेति-रुचिरे[9]र्द्दोर्भिश्चतुर्भिर्व्वं(र्ब्बं)भौ ।। 4
भ्रातुस्तस्यात्मजो(ऽ*)भूत्कलित-कुल-यशाः ख्यात-काकुस्थ-[10]नामा
लोके गीतः प्रतीक-पृय[11]-वचनतया कक्कुकः क्ष्माभृदीशः ।
श्रीमानस्यानुजन्मा कुलिशधर-धुरामुद्वहन्देवराजो
यज्ञे[12](ऽ*)च्छिन्नो[13]रु-पक्ष-क्षपित-ग-

5. ति कुलं भूभृतां सन्नियन्ता ।।
तत्सूनुः प्राप्य राज्यं निजमुदयगिरि-स्पर्द्धि-भास्वत्प्रतापः 5
क्ष्मापालः प्रादुरासीन्नत-सकल-जगद्वत्सलो वत्सराजः ।
यस्यैतास्सम्पदश्च द्विरद-मद-सुरास्वाद-सान्द्र-प्रमोदाः
पद्माक्षीराक्षिपन्त्य(:*) प्रणयि-जन-परिष्वङ्ग-कान्ता विरेजुः ।। 6
ख्या[ताद्भण्डि]-[14]

6. कुलान्मदोत्कट-करि-प्राकार-दुर्ल्लङ्घतो
यः साम्राज्यमधिज्य[15]-कार्म्मुक-सखा संख्ये हठादग्रहीत् (।*)
एकः क्षत्त्रिय-पुङ्गवेषु च यशो-गुर्व्वीन्धुरं प्रोद्वह-
न्निक्ष्वा[को]ः कुलमुन्नतं सुचरितैश्चक्रे स्व-नामाङ्कितं(तम्)।। 7

आद्यः पुमान्पुनरपि स्फुट-कीर्त्तिरस्मा-
ज्जातस्स एव किल नागभटस्तदाख्यः ।
यत्त्वा-

7. न्ध्र-सैन्धव-विदर्भ-कलिङ्ग-भूपैः
कौमार-धामनि पतङ्ग-समैरपाति ।। 8
त्त्रय्यास्पदस्य सुकृतस्य समृद्धिमिच्छु-
र्यः क्षत्त्र-धाम-विधि-व(ब)द्ध-व(ब)लि-प्रव(ब)न्धः ।
जित्वा पराश्रय-कृत-स्फुट-नीच-भावं
चक्रायुधं विनय-नम्र-वपुर्व्व्यराजत् ।। 9
दुर्व्वार-वैरि-वर-वारण-वाजि-वार-
याणौध[16]-संघट-

8. न-घोर-घनान्धकारं(रम्) ।
निर्ज्जित्य वङ्गपतिमाविरभूद्विवस्वा-
नुद्यन्निव त्त्रिजगदेक-विकासको यः ।। 10
आनर्त्त-मालव-किरात-तुरुष्क-वत्स-
मत्स्यादि-राज-गिरिदुर्ग्ग-हठापहारैः ।
यस्यात्म-वैभवमतीन्द्रियमाकुमार-
माविर्व्व(र्ब्ब)भूव भुवि विश्वजनीन-वृत्तेः ।। 11
तज्जन्मा राम-

9. नामा प्रवर-हरि-व(ब)ल-न्यस्त-भूभृत्प्रव(ब)न्धै-
राव(ब)ध्नन्वाहिनीनां प्रसभमधिपतीनुद्धत-क्रूर-सत्वान्[17] ।
पापाचारान्तराय-प्रमथन-रुचिरः सङ्गत(:*) कीर्त्ति-दारै-
स्त्राता धर्म्मस्य तैस्तैस्समुचित-चरितैः पूर्व्ववन्निर्व्व(र्ब्ब)भासे ।। 12
अनन्य-साधनाधीन-प्रतापाक्रान्त-दि-

10. ङ्मुखः ।
उपायैस्सम्पदां स्वामी यः सव्रीडमुपास्यत ।। 13
अर्थिभिर्व्विनियुक्तानां सम्पदां जन्म केवलं(लम्) ।
यस्याभूत्कृतिनः प्रीत्यै नात्मेच्छा-विनियोगतः ।। २४ ।।
जगद्वितृष्णः स विशुद्ध-सत्वः[18]
प्रजापतित्वं विनियोक्तुकामः ।
सुतं रहस्य-व्रत-सुप्रसन्ना-
त्सूर्यादवा-

11. पन्मिहिराभिधानं(नम्) ॥ 15
उपरोधैक-संरुद्ध-विन्ध्य-वृद्धेरगस्त्यतः(।*)
आक्रम्य भूभृतां भोक्ता यः प्रभुर्भोज इत्यभात् ॥ 16
यशस्वी शान्तात्मा जगदहित-विच्छेद-निपुणः
परिष्वक्तो लक्ष्म्या न च मद-कलङ्केन कलितः।
व(ब)भूव प्रेमार्द्रो गुणिषु विषयः सुनृत-

12. गिरा-
मसौ रामो वाग्रे स्व-कृति-गणनायामिह विधेः ॥ 17
यस्याभूत्कुल-भूमि-भृत्प्रमथन-व्यस्तान्य-सैन्याम्वु(म्बु)धे-
र्व्यूढां च स्फुटितारि-लाज-निवहान्हुत्वा प्रतापानले ।
गुप्ता वृद्ध-गुणैरनन्यगतिभिः शान्तैस्सुधोद्भासिभि-
र्द्धर्म्मापत्य-यशः-प्रभूतिरपरा लक्ष्मीः पुनर्भू -

13. र्न्नया ॥ 18
प्रीतैः पालनया तपोधन-कुलैः स्नेहाद्गुरूणां गणै-
र्भक्त्या भत्य[19]-जनेन नीति-निपुणैर्वृन्दैररीणां पुनः ।
विश्वेनापि यदीयमायुरमितं कर्त्तुं स्व-जीवैषिणा
तन्निघ्ना विदधे विधातरि यथा सम्पत्परार्द्ध्याश्रये ॥ 19
अवितथमिदं यावद्विश्वं श्रुते-

14. रनुशासना-
द्भवति फलभाक्कर्त्ता नेशः क्षितीन्द्र-शतेष्वपि ।
अधरित-कलेः कीर्त्तेर्भर्त्तुस्सतां सुकृतैरभू-
द्विधुरित-धियां सम्पद्वृद्धिर्यदस्य तदद्भुतं(तम्)॥ 20
यस्य वैरि-वृहद्वङ्शान्दहतः[20] कोप-वह्निना ।
प्रतापादर्णसां राशीन्पातुर्व्वैतृष्ण्यमाव(ब)भौ ॥ 21
कुमार इव विद्यानां

15. वृन्देनाद्भुत-कर्म्मणा
यः शशासासुरान्घोरान्स्त्रैणेनास्त्रैक-वृत्तिना ॥ 22
यस्याक्षपटले राज्ञः प्रभुत्वाद्विश्व-सम्पदः ।
लिलेख मुखमालोक्य प्रातिलेख्यकरो विधिः ॥ 23
उद्दाम-तेजः-प्रसर-प्रसूता
शिखेव कीर्त्तिद्युर्मणिं विजित्य ।
जाया जगद्भर्त्तु-

16. रियाय यस्य
चित्त्वं त्विदं यज्जलधीन्स्ततार[21] ॥ 24
राज्ञा तेन स्व-देवीनां यशः-पुण्याभिवृद्धये ।
अन्तःपुर-पुरं नाम्ना व्यधायि नरकद्विषः ॥ 25
यावन्नभः सुरसरित्पस[22]रोत्तयरीयं
यावत्सुदुश्चर-तपः-प्रभवः प्रभावः ।
सत्यञ्च यावदुपरिस्थमवत्यशेषं[23]
तावत् पु-

17. नातु जगतीमियमार्य्य-कीर्त्तिः ॥ 26
पातुर्व्विश्वस्य सम्यक्परम-मुनि-मत-श्रेयसस्सम्वि[24]धाना-
दन्तर्वृत्तिर्व्विवेकः स्थितैव पुरतो भोजदेवस्य राज्ञः ।
विद्वद्वृन्दार्ज्जितानां फलमिव तपसां भट्ट-धन्नेक-सूनु-
र्व्वा(र्ब्बा)लादित्यः प्रशस्तेः कविरिह जगता साकमाकल्प-वृत्तेः ॥ 27

---

1. From the facsimile in *Arch. Surv. Ind., An. Rep.*, 1903-04.
2. Symbol for *siddhaṃ* or *Oṁ siddhiḥ* (*siddhir=astu*).
3. The letter *b* has been denoted by the sign for *v* throughout the record. Read *vimba-chumbi*.
4. Correctly *Kākutstha*. A Kadamba king also is, however, called *Kākusthavarman* (not *Kākutstha°*) in all Kadamba records mentioning him.
5. Read *hiṁsraṁ*.
6. Read *tad-vaṁśe*.
7. Read *mūrtti°*.
8. Hirananda Sastri reads *valana* and Bhandarkar *valacha*.
9. Read *ruchirai°*.
10. Correctly *Kākutstha*.
11. Read *priya*.
12. Read *jajñe*.
13. Read *°chchhinn-o°*.
14. The name of the family is not quite distinct.
15. Read *°m=adhiya°*
16. Read *yān-augha°*.
17. Read *°sattvān*.
18. Read *°sattvaḥ*.
19. Read *bhṛitya*.
20. Read *bṛihad-vaṁśā°*; *bṛihad-vaṅgā°* was originally read by scholars.
21. Read *°dhīṁs=tatāra*.
22. Read *°t-prasar-o°*.
23. Read *°parishṭha°*.
24. Read *°s=saṁvidhā°*.

No. 11—Inscriptions on Some Billon Coins of Bhoja I Ādivarāha (c. 836-85 A.D.)

D. C. Sircar, *Stud. Ind. Coins*, p. 383, No. XVI/4; cf. Smith, *Catalogue of Coins in the Indian Museum*, pp. 41-42.

First Side

Figure of a human being with boar's head (i.e. the Boar incarnation of Vishṇu).

Second Side

Indistinct marks, in place of which the silver issues have the legend—

(1) *Śrīmad-Ā-*
(2) *divarāha*

"The illustrious Primeval Boar."[1]

---

[1] *Ādivarāha* (i.e. the Boar form of Vishṇu) was a second name of king Bhoja I. The coins are mentioned in the Siyadoni inscription as 'the Ādivarāha-dramma'; but they may really be double-dramma. The Attic Drachma weighed 67. 5 grains; but the Indian *Dramma*=Drachma weighed only half of that.

No. 12—Mahīsantosh Sūrya Image Inscription of the time of Mahendrapāla I (c. 885-908 A.D.), Regnal year 15

Mahīsantosh, Dinajpur District, Bangladesh (near Balurghat, West Dinajpur Dist., West Bengal).
D.C. Sircar, *Ep. Ind.*, XXXVII, pp. 204-08.

Language : Sanskrit.

Script : Siddhamātṛikā.

Summary : An image of the SUN-GOD is stated to have been caused to be made (i.e. installed for worship) by LOKANANDIN, son of Gaṅganandin and grandson of Vishṇunandin, during the reign of MAHENDRAPĀLA (I) on the 7TH of the BRIGHT FORTNIGHT of MĀRGAŚĪRSHA in the king's 15TH REGNAL YEAR. This inscription together with the Pāhāḍpur (Rajshahi District, Bangladesh) epigraph of year 5 and some other records discovered in South Bihar and bearing dates ranging from year 2 suggests that the Gurjara-Pratīhāra king Mahendrapāla I was in occupation of wide areas of Bengal and Bihar from the 2nd to the 15th year of his reign, so that the contemporary Pāla king Nārāyaṇapāla had probably to become the former's vassal or subordinate ally.

TEXT[1]

1. [सिद्धम् ॥][2] सस्वत्[3] १५ मार्ग्ग-शुक्ल-सप्तम्यां श्री-महेन्ध्र(न्द्र)पाल-
देव-वी(वि)जय-राज्ये विष्णु-
[न]न्दि-नप्ता(प्त्रा) गङ्गनन्दि-सूनु[4] लोकनन्धि(न्दि)ना आदित्य-
2. भट्टारकः कारित इति(॥*)गन(ण)क-वी[5]

---

1. From impressions. See Plate in *Ep. Ind.*
2. Expressed by symbol.
3. Read *saṁvat.*
4. Better read *sūnunā.*
5. The writing, which seems to have been continued on the central part of the image, probably referred to the writer of the document.

No. 13—Partāpgaḍh Stone Inscription of Mahendrapāla II, [Vikrama] year 1003 (946 A.D.)

Partāpgaḍh, Chitorgaḍh District, Rājasthān.
G.H. Ojha, *Ep. Ind.*, XIV, pp. 182ff.

Language : Sanskrit.
Script : Siddhamātrikā.
Metres: Vv. 1, 7, 11-12 *Anushṭubh*; V.2 *Mandākrāntā*; Vv. 3, 5, 8, 10 (half) *Śārdūlavikrīḍita*; Vv. 4, 6, 9 *Vasantatilaka*.

Summary : The inscription, divided into four parts, records several grants.—I. *Mahārāja* DEVAŚAKTI, a devotee of VISHṆU; his son born of BHŪYIKĀDEVĪ, *Mahārāja* VATSARĀJA, a devotee of MAHEŚVARA; his son born of SUNDARĪDEVĪ, *Mahārāja* NĀGABHAṬA II, a devotee of BHAGAVATĪ; his son born of ĪSAṬĀDEVĪ, *Mahārāja* RĀMABHADRA, a devotee of ĀDITYA; his son born of APPĀDEVĪ, *Mahārāja* BHOJA (I), a devotee of BHAGAVATĪ; his son, born of CHANDRABHAṬṬĀRIKĀDEVĪ, *Mahārāja* MAHENDRAPĀLA (I) a devotee of BHAGAVATĪ; his son born of MAHĀDEVĪ, *Mahārāja* VINĀYAKAPĀLA, a devotee of ĀDITYA; and his son, born of PRASĀDHANĀDEVĪ of the DEVAVVARIDDHI (?) family, *Mahārāja* MAHENDRAPĀLA II, a devotee of MAHEŚVARA. At the request of Dhanaśūra, Mahendrapāla II granted from his capital at MAHODAYA the village of KHARPARAPADRAKA situated in the holding of *Talavargika* HARISHŪḌA and in the vicinity of GHOṆṬĀVARSHIKĀ in the Western *Pathaka* of DAŚAPURA, to the goddess VAṬAYAKSHIṆĪ whose shrine was connected with the *Maṭha* of Harsheśvara, a Brāhmaṇa of Daśapura. The grant, issued on the 5TH DAY of the DARK HALF of MĀRGA (Mārgaśīrsha) in [VIKRAMA] SAṀVAT 1003 (1046 A.D.) was written under orders from Jajjanāga by *Purohita* Trivikrama[nātha] and was signed by ŚRĪ-VIDAGDHA. II. In the family of the CHĀHAMĀNAS, which was the source of great pleasure to king BHOJADEVA, was born GOVINDARĀJA. From him sprang DURLABHARĀJA whose son *Mahāsāmanta* INDRARĀJA built the temple of Indrādityadeva at GHOṆṬĀVARSHIKĀ, a place associated with the god NITYAPRAMUDITADEVA. When Śrīśarman appointed by KOKKAṬA, the *Balādhikṛita* of the *Parameśvara* (i.e. Mahendrapāla), was carrying on the affairs of state at MAṆḌAPIKĀ, MĀDHAVA, the *Mahāsāmanta* and *Daṇḍanāyaka* of UJJAYANĪ and the son of DĀMODARA, granted, at the request of CHĀHAMĀNA INDRARĀJA, the village of DHĀRĀPADRAKA together with trees, *kāshṭha*, *triṇa*, *goprachāra*, *jala*, *sthala*, *bhāga-bhoga-kara-hiraṇya* and *skandhaka-mārgaṇak-ādi-rāja-bhāvya* to the temple of INDRĀDITYADEVA. A further endowment of a field by the riverside to the north of the village, irrigated by a Persian wheel (*arahaṭa*=*araghaṭṭa*), and of five matting screens for the erection of a flower porch was also made. The grant was signed by MĀDHAVA and countersigned by VIDAGDHA. III. [The Guhiha] *Mahārājādhirāja* BHARTṚIPAṬṬA, son of KHOMMĀṆA, bestowed upon the god Indrādityadeva of Ghoṇṭāvarshi a field named VAVVŪLIKA by the side of the river NANDYĀ in the village of PALĀŚAKŪPIKĀ on the FIRST DAY of the BRIGHT HALF of ŚRĀVAṆA in [VIKRAMA] SAṀVAT 999 (942 A.D.).

IV. (a) DEVARĀJA, son of CHĀMUṆḌARĀJA, made to Indrādityadeva a gift of the field called CHHITTULLĀKA in which 10 *māṇis* of seed could be sown and which was situated in Kosavāha (place). (b) Indrarāja made a gift of the field called UṀḌIĀKA to the god TRAILOKYAMOHANADEVA in the grounds of INDRĀDITYADEVA. (c) The trading community made on the 9TH DAY of the BRIGHT HALF of the month of CHAITRA the permanent endowment of one *palikā* of oil per oilmill, five bundles of foliage, 100 garlands of four strings together with two *palas* of saffron and one *pala* of betelnut in favour of VAṬAYAKSHIṆĪDEVĪ. (d) Some persons (not specifically mentioned) offered as gift to unspecified deities the DHĀḌIVĀHA field in which 10 *māṇis* of seed could be sown and the MOCHCHA field requiring 10 *māṇis* of seed and lying to the north-east of Ghoṇṭāvarshi.

The inscription, dated in [Vikrama] SAṀVAT 1003 (1046 A.D.) was engraved by Siddhapa, son of Satya.

TEXT[1]

1. ......[न*][म]:[2] ।।
भवंतु[3] भव[तां] [भानो]भू॑तये भानवः सदा ।।[4]
प्रातर्न्नभ[स्त]रोस्ताम्राः पवित्राः पल्लवा इव । 0 ।। 1
व्र(ब्र)[5]ह्मादीनां नियमितद्धियां[6] [स्तोत्र]-पात्रं यदेकं ।[7]
यस्मिन्नेताः पुनरपि दिशो ।[7]

2. – U – –U – – [।*][9]
सूर्या[द्या][8]ख्यं प्रतिदिनमहो ध्यायते यन्मुनीन्द्रै:[9]
तेजस्तद्वो हरतु दुरितं पावनं सप्तसप्तेः । 0 । 2
रुद्रे विद्रवति द्रुतं सुरपतौ प[स्त्यं] प्रति प्रस्थिते ।[7]
वित्तेशे प्रतिपन्नरायि [त]

3. U – – –U[शार्ङ्गे] सति (।*)
वैकुण्ठे मतिकुण्ठतामुपगते व्रा(ब्रा)[ह्म्यं] [श्रि]ते व्र(ब्र)ह्मणि ।[7]
पायाद्वो महिषासुरं सुररिपुं देवी दृशा निघ्नती ।। 0 । 3
वर्ण्ण-द्वयाभ्यसनमम्व(म्ब) तवेदमेव
दुर्ग्गति नाक-गमनाय

4. U – U –[न्ति] ।
कात्यायनीति वरदेति च सन्ति कस्याः[10]
नामाक्षराणि परमाणि यथा भवत्या(:*)। 0 । 4
१ँ[11] स्वस्ति। श्री-महोदय-समावासितानेक-नौ-हस्त्यश्व-रथ-पत्ति-सम्पन्न-स्कन्धावारात्प-

5. [रम*][वै]ष्णवो महाराज-श्री-देवशक्तिदेवस्तत्त्य पुत्रस्ततत्पादानुध्यात(:*) श्री-भूयिकादेव्यामुत्पन्न(:*) परममाहेश्वरो महाराज-श्री-वत्सराजदेवस्तस्य पुत्रस्तत्पादानुध्यात(:*) श्री-

6. [सु]न्दरीदेव्यामुत्पन्नः परं[12] भगवती-भक्तो महाराज-श्री-नागभटदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्रीमदीसटादे यामुत्पन्नः परमादित्यभक्तो महाराज-श्री-रामभद्र-

7. [दे]वस्तस्य पुत्रस्तत्पादानुध्या[तः] श्रीमदप्पादेव्यामुत्पन्नः परम्भगवती[12]-भक्तो महाराज-श्री-भोजदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्री-चन्द्रभट्टारिकादेव्यामुत्पन्नः परं[12]

8. भगवती-भक्तो महाराज-श्री-महेन्द्रपालदेवस्तस्य पुत्रस्तत्पादानुध्यातः श्री-महादेवीदेव्यामुत्पन्नः परमादित्यभक्तो महाराज-श्री-विनायकपालदेवस्तस्य पुत्रस्तत्पा-

9. दानुध्यातः श्री-देवर्व्वा[र]द्धि-नाम-निज-कुल-प्रसाधनादेव्यामुत्पन्नः
परममाहेश्वरो महाराज-श्री-महेन्द्रपालदेवः श्री-दशपुर-पश्चिमपथके
तलवर्ग्गिक-हरिषूड[13]-भुज्य-
10. मान-खर्प्परपद्रक-ग्रामे घोण्टावर्षिका-प्रत्यासन्ने समुपगतान् सर्व्वान्नि[14]
यथास्थान-नियुक्तान्प्रतिवासिनश्च समाज्ञापयत्यस्तु वः[15] उपरिलिखित-
ग्रामः स्व-सीमा-तृण-प्रति-[16]
11. गोचर-पर्यन्तो[17] सर्व्वादाय-समेत श्रा-चन्द्रार्क्क-क्षिति-कालं पूर्वदत्त-देव-
व्रह्मादेय[18]-वर्ज्जितो मया पित्रोः पुन्या[19]भिवृद्धये कार्[हं(र्त्ति)]क्यां
गंगायां स्नात्वा पुन्ये(ण्ये)(ऽ*)हनि धनशूर-प्रार्थनया श्री-
12. दशपुर-चातुर्व्वेद्य-हरिर्षेश्वर[20]-मठ - संव(ब)ध्यमान-श्री- वटयक्षिणीदेव्यै
शासनत्वेन प्रतिपादितः(।*)मत्वा[21] भवद्भिः सामुनुमन्तव्यो[22]
प्रतिवासि-जनपदैरप्याज्ञा-स्रवण-[23] विधेयैर्भूत्वा यथा-
13. दीयमान-भाग-भोग-कर-हिरन्या[24]दिकमस्योपनेतव्यमिति (।*) श्रीजज्ज-
नाग-प्रदत्तादेशात्। संवत् १०० सं १०[25] १००३ मार्ग्ग-वदि[26] ५
(।*) पुरोहित-त्रिविक्रमताच्च[27] लिखितमिदम्[28]। स्वहस्तो(ऽ*)यं श्री-
14. विदग्धस्य। 0।
यो राज्ञामुपरि स्थितः[29] वसुमती-र[क्षा]र्थमुत्पादितः[30]
येनोच्चैः सुखमासितं क्षितिभृता श्री-भोजदेवेन च (।*)
यस्माद्वि(द्वि)भ्यति विद्विषः किमपरं यस्माच्च
15. लक्ष्मीर्न्नृणां ।[7]
सो(ऽ*)यं राजति राजचक्र-निलय[:]श्री-चाहमानां-
न्वयः[31] (॥*) 5

गोविन्दराज इति तत्र व(ब)भूव भूपो ।[7]
राका-शशाङ्क-किरणोत्कर-शुभ्र-कीर्त्तिः (।*)
येन प्र[च]ण्ड-भुज-दण्ड-तरण्डकेन ।[7]
प्रोता-[32]
16. रिता समर-सागरतो जयश्रीः (॥*) 6
यस्य पीन-वृ(बृ)हद्भीम-भुज-पञ्जर-मध्यगाः (।*)
विपक्षाः संकुचत्पक्षाः पतत्त्रिण इवाभवन् ॥ 7
लिक्ष्म्यालिंगित[33]-विग्रहो हरिरिव क्रोधाग्नि-दग्धाहितः
17. सर्व्वे[षां] च शरन्यता[34]मुपगतो भास्वत्प्रतापोदयः (।*)
श्रीमद्दुर्लभरा[ज]-नाम-नृपति(स्*)।[7] तस्मादभूदंगजो
वक्रं येन कृतं न चार्थिनि जने वक्त्रं द्विषीवायति ॥ 8
तस्मादनेक-समरार्ज्जि-

18. त-कीर्त्ति-कोशः[35]
चिंतामणिः प्रणयिनां प्रणतो द्विज(ा*)तेः ।*
यो योषितां तनुधरो(ऽ*)भिनवो मनोभूः[36]
भूषा भुवः समभवत्सुत इन्दराजः[37] ॥ 9
तेनाकारि हिमाचलेन्द्र-शदृशं[38] भासां
19. प्रभोर्भासुरं
धामेदं ध्वज-किङ्किणी-कल-मिलत्कोलाहल(ा*)लंकृतं(तम्) ॥ 10
स्वस्ति श्रीमदुज्जयन्यां[39] महासामन्त-दण्डनायक-श्री-माधवः ॥[7]
तथा मण्डपिकायां परमेश्वर-पादोपजीवि-वलाधीकृ-[40]
20. त-श्री-कोक्कट-नियुक्त-श्री-शर्म्मे[41] च व्यापारं कुर्व्वते[42] इत्यस्मिन्
काले वर्त्तमाने[43] इहैव श्रीमदुज्जयन्यायां[44] कार्याभ्यागत-तंत्रपाल-
महासामन्त-महादण्डनायक-श्री-माधवेनः[45] श्री-
21. दामोदर-सुतेन ।[7] चाहमानान्वय-महासामन्त-श्री-इन्द्रराज[46] ।[7] श्री-
दुर्ल्लभराज-सुतस्य प्रार्थनयाः[47] ।[7] श्री-विदग्ध-भोगावाप्तये धारापद्रक-
ग्रामे समुपगतान् सर्व्व-राजपुरुषान् व्रा(ब्रा)ह्म-
22. णोत्तरीयान् प्रतिनिवासी-जनपदांश्च वो(बो)धयत्यस्तु वस्संविदितं
श्री-महाकाल-देवायतने सुस्नात्वा महादेवमभ्यर्च्च्य मातापित्रोरात्मनश्च
सु-पुण्य-कर्म्म-यशो(ऽ*)भिवृद्धये ।[7] परलोक-हि-
23. ताय जल-चन्द्रं[48]-चपल-जीवितं तेत्त्य ।[7] क्षण-दृष्ट-नष्ट-संपदाः[49] समनु-
चिन्त्य[50] मीन-संक्र(ा*)न्तौ श्री-नित्यप्रमुदितदेव-प्रति[व(ब)द्ध]-घोंटा-
र्वषिकस्थाने श्रीमदिन्द्रादित्यदेवस्य खण्ड-स्फुटित-समार-
24. चनाय व(ब)लि-चरु-शत्रु[61]-प्रवर्त्तनाय ।[7] ग्रामो(ऽ*)यं स्व-सीमा-पर्यन्तं[52]
स-वृक्षमाला[कु]लं स-काष्ट-[53]तृण-गोप्रचारं स-जल-स्थल-समेतं ।[7]
चतुष्कंकट[54]-विशुद्धं भाग-भोग-कर-हिरन्या(ण्या)दि-स्कंध-
25. क-मा[र्ग]णकादि-राजभाव्यैस्सहितं[55] उदकपूर्व्वकेण शासनेन प्रदत्तं[56]
॥ मत्वैतदस्मद्वङ्श[57]जैरन्यैश्च धर्म्ममिदमनुपालनीयं[58] ।[7] प्रति-
निवासी[59]-जनपदैश्चाज्ञा-श्रवण-विधेयैर्भूत्वा
26. यथादीयमानं च दातव्यं(व्यम्) ॥ अपरं [चै]तस्मिन्नेव ग्रामे[60] उत्तरतो
[दिग्भा]गे साधारं कच्छकन्नाम[61] अरहटेन तु संयुतं दत्तं(त्तम्) । पुनः
पत्त्रमण्डपकिटिकाः पञ्च[62] शासनेन प्रदत्ताः ॥ स्व-ह-
27. स्तो(ऽ*)यं श्री-माधवस्य । स्व-हस्तो(ऽ*)यं श्री-विदग्धस्य ॥
संवत् ९९९ श्रावण-सुदि १ (॥*) समस्त-[रा]जावलि-पूर्व्वमग्रेह[63]

महाराजाधिराज-श्री-[भ[64]र्तृपट्टः] श्री-खोम्माण-सुतः[65] (।*)स्व-मातृ-
पित्रोरात्मनश्च ध-

28. र्म्माभिवृद्धये घोण्टावर्षीयेन्द्राजादित्यदेवाय। पलासकपिका-ग्रामे वंव्वू-
लिको न्नाम[66] कच्छ(:*)। अस्य चाघाटानि लिण्ख्यंते[67] पूर्व्वस्यां दिशि
स्वर्ग्गपाली (।*) दक्षिणस्यां दिशि च पलासकूपिका-

29. क्षेत्रांतरितं वराहपल्लि-ग्राम-वर्त्म। पश्चिमस्यां[68] दिशि सीमायां
क्षेत्राणि। उत्तरस्यां दिशि नन्द्या-नदी-समीपवर्त्तिनी [स]मेत्ताघाटा-
तै[69] सहायं व[ं]व्वूलियको नाम कच्छो[70] अस्माभिः प्रदत्तः (।*)
मत्वास्म-

30. त्पुत्र-पौत्रादिकैरयं[71] च माचन्द्रार्क्क-क्षित्युदधि-समकालं पालनी(य*:)
(।*) एतदीय-रति-परिपंथना न केनापि कर्त्तव्याः[72] ।0।
भूमिं यः प्रतिगृह्णाति[73] यश्च भूमि[ं] प्रयच्छति (।*)
द्वावेतौ पुण्यकर्म्माणौ

31. नियतौ स्वर्ग्गगा(मि*)नौ (॥*) [Lotus symbol]11
श्री-देवाराजेन[74] श्री-चामुण्डराज-सुतः[75] श्रीमदिन्द्रादित्यदेवस्य कोसवाहे
छितुल्लाक-क्षेत्रं माणिवाप १० शासनेन प्रदत्तं(त्तम्) ॥ श्रीमदिन्द्रादित्य-
देव-जगत्यां ।[7] त्रै-

32. लोक्यमोहनदेवस्य[77] श्रीमदिन्द्रराजेन उंडिग्राक-क्षेत्रं[78]। आघाटा लिख्यंते
(।*)दक्षिणतः सा[धार]वहं पश्चिमतो राजवर्त्मनी(।*)उत्तर-
पूर्व्वतः[79] व्रा(बा)ह्मण-केशवादित्यस्य क्षेत्रं(त्रम्) । एवं चतुराघा-

33. टोपलक्षितं[80] ।[7] शासनेन प्रदत्तं श्री-वटयक्षिणी[81] घाणा-पलिका १
पत्रमण्डपपालि[काश्च][82] ५ महानवम्यां चैत्रे पुष्पचौसरा शत्(तं) १००
वणि-वर्ग्गेन[83] कुंकुम[84]-पल २ पुग[85] १ चैत्रे निवे-

34. दनीया(नि*) ॥0॥ धाडिवाहा-क्षेत्रं माणिवाप ६ लौडाभिक्षश्र- भोज्ये
दातव्य[ं] मास-वि ५ घोण्टावर्षि-पूर्व्वोत्तरतः[86] मोच्च-क्षेत्रं माणि-
वाप १० (॥*)
षष्ठीवरिष[87]-सहस्राणि स्वर्ग्गे ति[ष्ठ]ति

35. भूमिदः (।*)
आच्छेता[88] चानुमन्ता च्च[89] तान्येव नरकं [वसेत्*] (॥*) 12
[सत्य][90]-सु[त]-सिद्धपेन[91] इयं प्रशस्ती[92] उत्कीर्ण्णमिति ॥
संवत् १००३ (॥*)

1. From the facsimile in *Ep. Ind.*, XIV.
2. Some six letters appear to be lost before [*ma*]*ḥ*. They may be conjecturally restored as the *Siddham* symbol followed by *Ādityāya namaḥ*.
3. Read *bhavantu*.
4. Only one *daṇḍa* is required for proper punctuation.
5. *V* and *b* are not distinguished in the record, both being represented by the symbol for *v*.
6. Read *dhiyāṁ*.
7. The *daṇḍa* is unnecessary.
8. The *akshara dyā* is doubtful.
9. Read °*ndrais=teja*°.
10. Read *kasyā*.
11. Symbol for *siddhaṃ* (or *siddhir=astu*) or *Oṁ siddhiḥ*.
12. Instead of *parama*°, *paraṁ* is used before *Bhagavatī-bhakta*.
13. The intended reading may be *Harishaṁḍa* or °*śūra*.
14. Read *sarvvān=eva*.
15. Supply *saṁviditaṁ yathā*.
16. Read *pūti* or *yūti*.
17. Read *paryantaḥ*.
18. Read *deva-brahmadeya*.
19. Read *puṇy-ā*°.
20. Possibly *Harsheśvara*. Ojha suggests *Hari-ṛshīśvara* (*Haryṛishīśvara*).
21. I.e. *evaṁ matvā* or °*pādita iti matvā*.
22. Read *samanumantavyaḥ*.
23. Read *śravaṇa*.
24. Read *hiraṇy=ā*°.
25. Ojhā reads *saṁvartsro* 1000 1003. But Bhandarkar's suggestion seems to be better. *Saṁ* has been wrongly placed before the symbol for 10, and 1000 appears to have been expressed here by the symbols for 100 and 10.
26. *Mārga-badi* stands for *Mārgaśīrsha-bahulapaksha-divasa*.
27. Possibly *Trivikramanātha*°.
28. Supply *śāsanaṁ* after *idaṁ*.
29. Read *sthito*.
30. Read °*dito*.
31. Read °*n-ānvayaḥ*.
32. Read *prottā*°.
33. Read *lakshmyā*.
34. Read *śaraṇya*°.
35. Read *kośaś=chintā*°.
36. Read *bhūr=bhūshā*.
37. Read *Indrarājaḥ*.
38. Read *sadṛiśaṁ*.
39. In both lines 19 and 20, *Ujjayinī* is written as *Ujjavani*.
40. Read *balādhi*°.
41. Read *śrī-Śarmmaṇi* or *Śrīśarmmaṇi*.
42. Read *kurvati*.

43. Better read *°māna ih=aiva.*

44. Read *°yanyāṁ.*

45. Omit *visarga.*

46. Read *Śr-Īndrarājasya.*

47. Omit *visarga.*

48. Read *chandra* and *avetya.* It is better to have *chapalaṁ jīvitam=avetya.*

49. Read *sampadaḥ.* It is better to have *hshaṇa-dṛishṭa-nashṭāḥ sampadaḥ.* Ojha's transcript has *dashṭa.*

50. Read *°chintya.*

51. Read *sattra.*

52. Generally we have *sva-sīmā-poryantaḥ,* etc., as adjectives qualifying *grāmaḥ.* But *sva-sīmā-paryantaṁ,* etc., are also correct if we take them as adverbs.

53. Read *kāshṭha.*

54. Read *chatushkaṁṭaka.*

55. Read *°s=sahitam=udaka°.*

56. Read *pradattaḥ,* or better omit the *daṇḍas* and read *pradatta iti matv=ai°.*

57. Read *vaṁśajai°.*

58. Ojha corrects it to *dharmo=yam=anupālanīyaḥ.*

59. Read *°vāsi°.*

60. Better read *grāma utta°.*

61. Better read *°n=nām=ārahaṭena.*

62. Ojha reads *paṇcha.*

63. Read *°m=ady=eha.*

64. *Bha* was at first omitted and is written below the line. This name is also found as *Bharttṛibhaṭa.*

65. The text of the grant which had originally been recorded on *kārpāsa°* or *bhūrja-patra* is not given here in full. Only the donor and his father, his purpose, the god, the land and its boundaries are summarily mentioned. This is the case also with other grants that follow here. Add *samājñāpayati.*

66. Read *nāma.*

67. Read *āghāṭā likhyante.*

68. Read *paśchimāyāṁ.*

69. Read *°ghāṭaiḥ* (or *ṭanaiḥ*) *sah=ā°.*

70. Read *kachcho='smābhi°.*

71. Read *°r=ayam=āchandr-ā°.*

72. Omit *visarga.*

73. Read *gṛihṇāti.*

74. Read *Śrī-Deva°.*

75. Read *°sutena.*

76. The intended reading seems to be *°devasya* as in the other case in this line. It should better be corrected to *devāya* (see l. 27).

77. Read *devāya.* Is *sutena* or *prārthanayā* to be supplied after *devasya*?

78. Supply *śāsanena pradattam.*

79. Better read *°pūrvato Brāhmaṇa°.*

80. Supply *kshetraṁ* or *Uṁḍiyāka-kshetraṁ.*

81. Supply *devyai* after *yakshiṇī*° or read °*yakshiṇyai*.
82. Probably *palikā* is intended.
83. Read *vaṇig-varggeṇa*.
84. Read *kuṅkuma*.
85. Read *pūga*.
86. Better read °*rato*.
87. Read *shashṭiṁ varsha*°.
88. Read *āchchhettā*.
89. Read *cha*.
90. *Satya* is not beyond doubt.
91. Better read °*pen=eyaṁ*.
92. Read *praśastir=utkīrṇṇ=eti*.

No. 14 Khajurāho Stone Inscription of Dhaṅga of the time of Vināyakapāla, [Vikrama] year 1011 (954 A.D.)

Khajurāho, Chhatarpur District, Madhya Pradesh
Kielhorn, *Ep. Ind.*, I, pp. 124ff.

Language : Sanskrit.
Script : Siddhamātṛikā.

Metres: V.1 *Śikhariṇī*; Vv. 2-4 *Śārdūlavikrīḍita*; Vv. 5-6 *Śikhariṇī*; Vv. 7-8 *Śārdūlavikrīḍita*; V. 9 *Mandākrāntā*; Vv. 10-11 *Śārdūlavikrīḍita*; V. 12 *Upajāti*; V. 13 *Vasantatilaka*; V. 14 *Āryā*; V. 15 *Upajāti*; V. 16 *Śloka* (*Anushṭubh*); V. 17 *Śārdūlavikrīḍita*; V. 18 *Vasantatilaka*; V. 19 *Śārdūlavikrīḍita*; V. 20 *Sragdharā*; V. 21 *Śloka* (*Anushṭubh*), V. 22 *Vasantatilaka*; V. 23 *Sragdharā*; V. 24 *Śikhariṇī*; V. 25 *Śārdūlavikrīḍita*; Vv. 26-27 *Sragdharā*; V. 28 *Śārdūlavikrīḍita*; V. 29 *Mandākrāntā*; V. 30 *Śārdūlavikrīḍita*; V. 31 *Sragdharā*; V. 32 *Śārdūlavikrīḍita*; V. 33 *Vasantatilaka*; V. 34 *Śloka* (*Anushṭubh*); V. 35 *Śārdūlavikrīḍita*; V. 36 *Sragdharā*; Vv. 37-39 *Śārdūlavikrīḍita*; V. 40 *Vasantatilaka* Vv. 41-42 *Sragdharā*; Vv. 43-44 *Śārdūlavikrīḍita*; Vv. 45-46 *Vasantatilaka*; V. 47 *Āryā*; V. 48 *Śloka* (*Anushṭubh*).

Summary : The inscription begins with an adoration to the god Vāsudeva or Hari, also called Vaikuṇṭha. It then mentions Yaśovarman probably because it was originally meant tohave been a eulogy of that monarch. The genealogy of the Chandellas runs as follows—Vedhas (Brahman); his mind-born son Atri; his son Chandrātreya (Chandra, the Ātreya or son of Atri); in his family Nannuka; his son Vākpati; his sons Jayaśakti and Vijayaśakti; the latter's son Rāhila; his son Harsha who married the Chāhamāna princess Kañchhukā or Kambukā; their son Yaśovarman obtained military success against the Gauḍas, Khasas, Kośalas, Kaśmīras, Mithilas, Mālavas, Chedis and Gūrjaras. The same king is further described as having overcome the Chedi ruler and also captured the hill fort of Kālañjara. Another name of Yaśovarman was Lakshavarman whose war elephants sported in the waters of the GAṄGĀ (Jahnu's daughter) and YAMUNĀ (Kalinda's daughter). Yaśovarman installed an image of the VAIKUṆṬHA form of Vishṇu which he obtained from *Hayapati* DEVAPĀLA. The image had been secured from the KAILĀSA by the king of the BHOṬA (Tibetan) people, who gave it to his friend, the Kīra king, and from him it went to the monarch Herambapāla, the father of the above-mentioned Devapāla.—Yaśovarman's son and successor was Dhaṅga who ruled over the territory bounded by KĀLAÑJARA, BHĀSVAT (Bhāyillasvāmin) on the MĀLAVA-NADĪ (Vetravatī), the bank of the KĀLINDĪ (Yamunā), the country of the CHEDIS and GOPAGIRI (Gwalior).—The poet MĀDHAVA, son of Dedda, composed the eulogy which was engraved by *Karaṇika* JADDHA who belonged to the Gauḍa clan and was the son of Jayaguṇa.—The eulogy was written in [VIKRAMA] 1011 (954 A.D.) when VINĀYAKAPĀLA was ruling the earth (i.e. was the overlord of the Chandellas). The inscription ends with an adoration to the gods VĀSUDEVA and SAVITṚI (Sun-god).

TEXT[1]

1. ओं नमो भगवते वासुदेवाय ॥
दधानानेकां यः किरि-पुरुषसिं[हो(ऽ*)भय]जुषं
तदाकारोच्छेद्यां तनुमसुरमुख्यानजवरात् ।
जघान-त्रीनुग्रान्ज[3]गति कपिलादीनवतु वः
स वैकुण्ठः कण्ठ-ध्वनि-चकित-निःशेष-भुवनः ॥ 1
पायासुर्व्व(र्ब्ब)लि[4]-वण्चन[5]-व्यतिकरे देवस्य विक्रान्तयः
सद्यो विस्मित-देव-दानव-नुतास्तिस्रस्त्रिलकीं[6]

2. हरेः ।
यासु व्र(ब्र)ह्म-वितीर्ण्णमर्घ-सलिलं पादारविन्द-च्युतं
धत्ते(ऽ*)द्यापि जगत्रयैक[7]-जनकः पुण्यं स मूर्द्ध्ना हरः ॥ 2
देवः पातु स वः पयः-कण-भृति व्योम्नीव ताराचिते
दैत्यासि-व्रण-लांच्छने[8] दिविसदः संत्यज्य सर्व्वानपि ।
तस्मिन्नञ्जनशैल-भित्ति-विपुले वक्ष-स्थले यस्य ताः
पेतुर्मन्दर-सङ्ग-संभ्रम-वलल्लक्ष्मी-कटाक्ष-च्छटाः ॥ 3

गंभीरो-
3. म्वु(म्बु)धयः शशांक-रुचिमान्भास्वत्प्रतापोज्वलो[9]
धीरो धात्रि महान्महीधर-वराः कल्पद्रुमास्त्यागवान् ।
आ कल्पादविकल्प-निर्म्मल-गुण-ग्रा[मा]भिरामः[10] प्रभुः
सत्यं व्रुत[11] यदि क्वचित्पुनरभूत्तुल्यो यशोवर्म्मनः[12] ॥ 4
प्रधानादव्यक्तादभवदविकारादिह महा-
नहंकारस्तस्मादजनि जनितोपग्रह-गणः ।
ततस्तन्मात्राणि प्रसव-
4. मलभंन्त[13] क्र(म*)[14]-वशा-
दथैतेभ्यो भूतान्यनु भुवनमेभ्यः प्रववृते ॥ 5
इहाद्यो विद्यानां कविरखिल-कल्प-व्युपरतौ[15]
परः साक्षी देवस्त्रिभुवन-विनिर्माण-निपुणः
स विश्वेषामीश(:*)स्मित-कमल-किञ्जल्क-वसति-
र्महिम्ना स्वेनैव प्रथममथ वेधाः प्रभुरभूत् ॥ 6
तस्माद्विश्वसृजः पुराणपुरुषादाम्नाय-धाम्नः कवे-
र्ये (ऽ*)भूवन्मु-
5. नयः पवित्र-चरिताः पूर्व्वे मरीच्यादयः ।
तत्रात्रिः सुषुवे निरन्तर-तपस्तीव्र-प्रभावं सुतं
चंद्रात्रेयमकृत्रिमोज्वलतर[16]-ज्ञान-प्रदीपं मुनिं(निम्) ॥ 7
अस्ति स्वस्ति-विधायिनः स जगतां निःशेष-विद्याविद-
स्तस्यात्मोपनताखिल-[स्रु]ति[17]निधेर्व्वन्शः[18] प्रशंसास्पदं(दम्) ।
यत्राभन्न पराक्रमेण लघुता नो चाटुकारोद्धति-
र्नाल्पाप्यंतर-सा-
6. रता न च फलप्राप्ति(:*) क्षयायात्मनः ॥ 8
त्रस्त-त्राण-प्रगुण-मनसा[ं] सर्व्व-संपत्पदाना-
मुद्युक्तानां कृत-कृतयुगाचार-पुण्यस्थितीनां(नाम्) ।
तत्रत्यानाममल-यशसां भूभुजां का प्रशंसा
येषां शक्तिः सकल-धरणी-ध्वंसने पालने वा ॥ 9
तत्र क्षत्र-सुवर्ण्ण-सार-निकष-ग्रावा यशश्चन्दन-
क्रीडालंकृत-दिक्पु-
7. रन्ध्रि-वदनः श्री-नन्नुको(ऽ*)भून्नृपः ।
यस्यापूर्व्व-पराक्रम-क्रम-नमन्निःशेष-विद्वेषिणः
स[ं]भ्रान्ताः शिरसावहन्नृपतयः [शे]षामिवाज्ञां भयात् ॥ 10

यस्यानंदित-वंदि-वृंद-रचित-स्तोत्र-क्रिया-प्रक्रमा-
तस[ं]क्रान्तम्वहु[19]-वैरि-वर्ग-जयिनः कंदर्प-कल्पाकृतेः ।
नाम क्षाम-तनूभृतां मृगदृशां सद्यो विधत्ते पदं
स्वान्तेषु
8. द्विषतां च रा[शिषु] व(ब)लाद्वैक्लव्यमव्याहतं(तम्) ।। 11
तस्मादभूदाजि-पराजितारेः
श्री-वा[क्प]तिर्वाक्पतितुल्य-वाचः ।
यस्यामला भ्राम्यति भानु-भाभिः
सहैव लोकत्रितयो(ऽ*)पि[20] कीर्त्तिः ।। 12
यस्यामलोत्पल-निषन्न[21]-किरात-योषि-
दुद्गीत-तद्गुण-कलध्वनि-रम्य-सानुः ।
क्रीडा-गिरिः शिखर-निर्झर-वारि-पात-
झात्का-
9. र-ताण्डवित-केकिगणः स विन्ध्यः ।। 13
तस्माद्विस्मय-धाम्नः क्षीरोव्धे[22]श्चन्द्र-कौस्तुभौ यद्वत् ।
द्वावात्मजावभूतां जयशक्तिर्विजयशक्तिश्च ।। 14
तयोर्द्वयोरप्यमित-प्रताप-
दावाग्नि-दग्धाहित-काननानि ।
कर्माणि रोमांच-जुषः समेताः
समूर्द्धकल्पं क्षितिपा स्तुवन्ति ।। 15
तत्रानुजन्मा तनयं राहिलाख्यमजीजनत् ।
निद्रा-द-
10. रिद्रतां यान्ति यम्विचिन्त्य[23] निशि द्विषः ।। 16
भीम-भ्राम्यदसि-स्रुचि स्रवदसृक्संपादिताज्यक्रिये
ज्या-निर्घोष-वषट्पदे क्रम-चरत्संरव्ध(ब्ध)-योधर्त्विजि ।
अश्रान्तः समराध्वरे(ऽ*)प्रतिहत-क्रोधानिलोद्दीपि[ते]
[वै]रोदर्च्चिषि यः पशूनिव कृती मन्त्रैर्जुहाव द्विषः ।। 17
श्री-हर्ष-भूपमथ भूमिभृताम्वरिष्ठः[24]
सो(ऽ*)सूत कल्पतरु-कल्पमन-
11. ल्प-सत्वः[25](।*)
अद्यापि यस्य सुविकासि-यशः-प्रसून-
गन्धाधिवास-सुरभीणि दिगन्तराणि ।। 18

यत्र श्रीश्च सरस्वती च सहिते नीति-क्रमो विक्रम-
स्तेजः सत्व[26]-गुणोज्वलं[27] परिणता क्षान्तिश्च नैसर्गिकी ।
सन्तोषो विजिगीषुता च विनयो मानश्च पुण्यात्मन-
स्तस्यानन्त-गुणस्य विस्मय-निधेः किन्नाम वस्तु स्तुमः ॥ 19
भीरुर्द्धर्मापराधे मधुरिपु-

12. चरणाराधने यः स-तृष्णः
पापालापे(ऽ*)नभिज्ञो निजगुण-गणना-प्रक्रमेष्वप्रगल्भः ।
शून्यः पेशुन्य[28]-वादे(ऽ*)नृत-वचन-समुच्चारणे जातिमूकः
सर्व्वत्रैवं स्वभाव-प्रथित-गुणतया नाम[कः*][29] स्तूयते(ऽ*)सौ ॥ 20
सो(ऽ*)नुरूपां सुरूपाङ्गः क[म्बु][30]काख्यामकुण्ठ-धीः (।*)
सवर्ण्णा[31]म्विधिनोवाह चाहमान-कुलोद्भवां(वाम्) ॥ 21
यस्याः पतिव्रत-तुलामधिरोढुमी-

13. शा
नारुन्धती गुरुतरामभिमानिनीति ।
पत्युः समीहित-विधान-परापि साध्वी
कार्श्यन्तथा परमगादतिलज्जितेव ॥ 22
गौड-क्रीडालतासिस्तुलित-खस-व(ब)लः कोशलः कोशलानां
नश्यत्कस्मी(श्मी)र-वीरः शिथिलित-मिथिलः कालवन्मालवानां(नाम्) ।
सीद[त्सा]वद्य-चेदिः कुरु-तरुषु मरुत्संज्वरो गूर्जराणां
तस्मात्तस्यां स जज्ञे नृप-कुल-

14. तिलकः श्री-यशोवर्मराजः ॥ 23
स दाता राधेयः स च शुचि-वाचा पांडु-तनयः
स शूरः पार्थो(ऽ)पि प्रथित-महिमानः किमपि ते ।
व्यतीताः किं व्रू(ब्रू)मो यदि पुन[रि]ह स्युः सचरिते[32]
[ह्रि]या नम्री[33]कुर्य्र्वंदनमवलो[क्यै]नमधुना ॥ 24
त्रस्त-त्रातरि तत्र भूभृति नृणां क्लेशाय शस्त्र-ग्रहः
कामं दातरि सिद्ध-केलि-सुमनस्तल्पाय कल्पद्रुमाः (।*)
वित्तेशः पर-

15. मर्थ[34]-वृद्धि-विधुर-स्वान्तो विलासी स चे-
दास्ये तस्य सतीन्दुरुत्पल-वन-प्रीत्यै दृशामुत्सवे ॥ 25
यस्योद्योगे व(ब)लानां प्र[स]रति रजसि व्याप्त-[भे]दो(ऽ*)[न्तराले]
स्वः-सिन्धुर्व्व(र्ब्ब)द्धरोधाः पिहित-रुचिरभूद्भानुरादर्श-र[म्य]ः ।

स[म्य]ग्देवेन्द्र-दन्ती मुदमधित वियत्साभ्रमालोच्य हन्साः[35]
सोत्कण्ठास्तस्थुरासीन्नयन-दशशती कूणितावृत्त-शन्नोः ॥ 26
अन्योन्याव(ब)-

16. द्ध-कोप-द्विप-कलह-मिलद्दन्तदण्डाभिघात-
प्रोद्यज्वाला[36]-कलाप-प्रसृत-हुतभुजि ज्या-घन-ध्वान-भीमे ।
पीतासृ(क्*)-क्षीव-रक्षः-प्रम[द]-क[ल]क[ल]-ह्लाद-रौ[द्र-प्रहासे]
धीरं भीते[व] लक्ष्मीः [समर-शि]रसि यं सं[भ्रमा]दालि[लिङ्ग] ॥ 27
उत्तुङ्गाञ्जन-शैल-सन्निभ-चलन्मत्त-द्विपेन्द्र-स्थित-
क्रुध्यद्दुर्द्धर-धन्वि-मार्ग्गण-गण-प्रारव्ध(ब्ध)-रक्षाक्रियं(यम्) ।
विख्यात-क्षिति-पाल-मौ-

17. लि-रचना-विन्यस्त-पादाम्वु(म्बु)जं
संख्ये(ऽ*)संख्य-व(ब)लं व्यजेष्ट गतभीर्य[श्चे]दि-राजं हठात् ॥ 28
लक्ष्म-च्छाया-कलुष-वपुषः कान्तिमद्दूरमि –
– – यत्त[37] [स्फुरि]त-विधुरा[त्सु]न्दरं चारवि[न्दात्] ।
य – – – U U U UU– – U– –र्ह-वृत्तेः[38]
संभ्रान्ताभिः कथमपि मुखं वीक्ष्य वैरि-प्रियाभिः ॥ 29
गङ्गा-निर्ज्झर-घर्घर-ध्वनि-भय-भ्राम्यत्तुरङ्ग-व्रजाः
सद्यः-सुप्त-विवु(बु)द्ध-केस-

18. रि-रव-त्रस्यत्करीन्द्राकुलाः ।
यत्सैन्यैः प्रति-कल्प-पादपमुमा-लून-प्रसूनोच्चयाः
प्रालेयाचल-मेखलाः कथमपि [क्रा]न्ताः श[नैर्द्दिग्जये] ॥ 30
उ[च्च-प्रा]कार-भि[त्ति-स्थित-[स]मद-[शिखि]–U[39]– –U[ना]द[40]
– – – – U – – श्लथ-[रथ]-तुरग-प्राप्त-वेगान्तरायः ।
यस्मिन्मध्यन्दिने स्यात्तरणिरनुदिनं नीलकण्ठाधिवासं
जग्राह क्रीडया यस्तिलकमिव भुवः

19. किञ्च कालंजराद्रि(द्रिम्) ॥ 31
आ शस्त्रग्रहणादखण्डित-महावीर-व्रत-प्रक्रियै-
रा वा(बा)ल्यादविलुप्त-सत्य-[समयै]रा पा[णि]पीडा-विधेः ।
अश्रान्तार्थि-वि[तीर्ण्ण]-पूर्ण्ण-विभवैस्त[थेप्सिता]कांक्षि[भि]-
दूरोत्कर्ष-कथा-कृ[तोच्च]-[41]पुलकैर्यः साधुभिः स्तूयते ॥ 32

[नि]न्दामुपै[मि] पुरुषान्तर-सङ्गमेन
[शान्ति]न्न जातु सतत-भ्रमण-क्रमेण ।
यस्यातिपौरुष-निरस्त-मनुष्यभावे
लोके समं[42]
20. भ्रमति कीर्त्तिरनिन्दितैव ॥ 33
एकैवोवाह लोकेस्मिन्पुत्र-जन्मोन्नतं शिरः ।
कम्बु[43]का येन धीरेण देवकीव मधुद्विषा ॥ 34
शौ[र्यौ]दार्य-नयादि-निर्म्मल-[गु]ण-ग्रामाभिरा[मं य*]शो
[यस्या*]शेष-[विशुद्ध*]-नाथ-[ति]लक[ङ्गा]य[न्ति] सिद्ध-[स्त्रि*]यः ।[44]
[तस्य स्तोत्रम]मित्र-मर्द्दन-रवे[45] स्पष्ट-प्रकाशीकृत-
त्रैलोक्यस्य सहस्र-संख्य-महसो दीप-प्रदानोपमं(पम्) ॥ 35
क्रोधोद्वृत्तान्तक-भ्रूकुटिल-
21. पटु-रल(ण)चचण्ड-कोदण्ड-यष्टि-
ज्याघात-स्फार-घोर-ध्वनि-चकित-मनः-संभ्रम-भ्रान्त-दृक्षु ।
स्पष्टं नष्टेषु दूरं क्वचिदपि रिपुषु क्षत्र-ते[जो](ऽ*)म्वु(म्बु)राशे-
– – – –U – – U U U[46][वि]जयिन[श्चण्डदो]र्द्दण्ड-क[ण्डू]: ॥ 36
[यो] लक्षव[र्म]-नृप[ते*]: शरदिन्दुकान्त-
माख्यातुमिच्छति यशः-प्रसक्त[47] वचोभिः ।
दीप-प्रभा-परिचयेन विमुग्धवु(बु)द्धि-
र्मध्यन्दिने दिवसनाथमुदीक्षते(ऽ*)सौ ॥ 37
22. यन्नाक्रामदवक्र-मानस-व(ब)लि-व्याज-प्रयोगापत-
त्पृथ्वी-लंघन-लव्ध(ब्ध)-लाघवमघच्छेदी पदं वामनः ।
लोकालोक-शिरः-शत-प्रतिहत-ज्योतिर्व्विवस्वान्न य-
त्तस्य क्रामति तन्निशाकर-[महाश्री*]-स्पर्द्धि-[शुभ्रं] यशः ॥ 38
धीरो दिग्विजयेषु केलि-सरसी[न्ती]व्र-प्रतापं [द]ध-
न्निश्शेष-द्विषदव्यथोभय-तटी-विन्यस्त-सेनाभरः ।
मज्जन्मत्त-करीन्द्र-पंकिल-जलां श्री-लक्षवर्मा-
23. भिध-
श्चक्रे शक्र-समः कलिन्दतनया जह्नोः सुतां च क्रमात् ॥ 39
आस्थानेषु महीभुजां मुनिजन-स्थाने सतां सङ्गमे
ग्रामे पामर-मण्डलीषु वणिजां वी[थ]ी-पथे चत्वरे ।
[अ*]ध्वन्यध्व[ग-सङ्क]थासु[48] निलये(ऽ*)र[ण्यौ]कसां विस्मया-

न्नित्यं [त*]द्गुण-कीर्त्तनैक-मुखराः सर्व्वत्र सर्व्वे जनाः ।। 40
यस्यान[ने] शरदखण्ड-शशि-प्रसन्ने
कोपं व्यनक्ति हृदयस्थमरि-प्रिया-
24. णां(णाम्) ।
सिंदूर-भूषण-विर्वाजितमास्य-पद्म-
मुत्सृष्ट-हार-वलयं कुच-मण्डलं च ।। 41
15. र्दानोदार-धृतिर्मतङ्गज-गतिर्नेत्रा[16]भिरामाकृतिः ।
शास्तृ-न्यस्त-नति[17] जनोदित-नुतिः कारुण्य-केलि-स्थिति-
नित्य[18]-श्री-वसतिः कृताघ-विहतिः स्फायद्गुणाहंकृ-

16. तिः ।। 13
जगति गहडवाले क्षत्र-व(ं*)शे प्रसिद्धे-
(ऽ*)जनि नरपति-चन्द्रश्चन्द्रमा[19]नामा नरेन्द्रः ।
यदसहन-नृपाणाङ्कामिनी-वाष्पवाहैः[20]
शितितरमिदमासीद्यामुन(ं*) तून[21]मम्भः ।। 14
नृ-

17. पति-मदनचन्द्रश्चण्ड-भूपाल-चूडा-
मणिरजनि स तस्माद्वि(द्वि)भ्रदेकातपत्र(म्*) ।
धरणि-तलमनल्प-प्रौढतेडो[22](ऽ*)नल-श्रीः
श्रियमपि च मघोनः स्व-श्रियाधो दधानः ।। 15
वाराण-

18. सीं भुवन-रक्षण-दक्ष एको
दुष्टान्तु[23]रुष्क-सुभटादवितुं हरेण ।
उक्तो हरिस्स पुनरत्र व(ब)भूव तस्मा-
द्गोविन्द चन्द्र इति प्रथिताभिधानः ।। 16
वत्साः कामदुहां कणा-

19. नपि पयःपूरस्य पातु(ं*) न ते
चित्रं प्रागल्भन्त याचक-मनः-सन्तोषमित्यव्ययात् ।
त्यागैर्यस्य महीभूजः[24] प्रमुदिते तद्याचकानाञ्चये
स्वच्छन्दाहित-नित्य-निर्भर-पयः-

20. पानोत्सवैरासते ।। 17
यद्विद्वेषि-महीभुजां पुरवरे प्रभ्रष्ट-हारावली-
र्ध्याधास्तन्मृग-पाश-व(ब)न्ध-मनसा गृह्णन्ति नैव भ्रमात् ।
व्यधाः स्रस्त-सुवर्ण्ण-कुण्डलमहि-भ्रान्त्या

21. तदत्यायतै-
र्दण्डैर्द्रागपसारयन्ति च भय-प्रोत्कम्पि-हस्त-स्रजः ।। 18
यस्योत्सन्न-विरोधि-भूपति-पुर-प्रासाद-पृष्ठोपरि
प्रत्यग्र-स्फुरदुग्र-शष्प-कवल-व्यालोल-वाजि-

22. व्रजः ।
आदित्यस्त्वभवत्स मन्थर-रथश्चन्द्रो(ऽ*)पि म दो(ऽ*)भवत्[25]
घास-ग्रास-विरुद[26]-लोभ-हरिण(*)रक्षन् पतन्तस्ततः ॥ 19
अहह कुमरदेवी तेन र(ा*)ज्ञा प्रसिद्धा
त्रि[27]-जगति
23. परिगी(णी)ता श्रीरिवेहाच्युतेन ।
प्रविलसदवरोधे तस्य राज्ञो(ऽ*)ङ्गनानां
नियतममृतरश्मेर्लेखिका तारकासु ॥ 20
वीहारो[28] नव-खण्ड-मण्डल-मही-हारः कृतो(ऽ*)यन्तया
24. तारिण्या वसुधारया ननु वर्पुव(र्बि)भ्राणयालंकृतः ।
यं दृष्ट्वा प्रविचित्र-शिल्प-रचना-चातुर्य्य-सीमाश्रयं
गीर्वाणैः सुदृश[श्च] विस्मयमगाद्द्राग्विश्वकर्मापि सः ।(।*) 21
श्री-धर्मचक्र-जि-
25. न-शासन-सन्निव(ब)द्धं
सा(या)जम्वु(म्बु)की सकल-पत्तलिवाग्रभूता[29] ।
तत्ताम्र-शासन-वर(ं*) प्रविधाय तस्यै
दत्त्वा(त्तं) तया शशि-रवी भुवि यावदास्ताम् ॥ 22
धर्माशोक-नराधिपस्य समये श्री-ध-
26. म[30]-चक्रो जिनो
यादृक् तन्नय-रक्षितः पुनरयश्चक्रे ततो(ऽ*)प्यद्भुतम् ।
वीहारः स्थविरस्य तस्य च तया यत्नादयङ्कारित-
स्तस्मिन्नेव समर्पितश्च वसतादाचन्द्र-चण्डद्युति ॥ 23
तत्कीर्त्तिम्प-
27. रिपालयिष्यति जनो यः कश्चिदुर्वीतले
सा तस्याङ्घ्रि-युग-प्रणाम-परमा यूयं जिनाः साक्षिणः ।
तस्याः कश्चिदनिश्चितो यदि यशो-व्यालोपकारी खलः[31]
तं पापीयसमा-
28. शु शासति पुनस्ते लोकपालाः क्रुधा ॥ 24
एकस्तीर्थिक-वादि-वारण-घटा-सङ्घट्ट-कण्ठीरवः
साहित्योज्वल[32]-रत्न-रोहणगिरिर्यो ह्यष्ट-भाषा-कविः
ख्यातो वङ्ग-महीभजः[33]
29. प्रणय-भूः श्री-कुन्द-नामा कृती
तस्याः सुन्दर-वर्ण्ण-गुम्फ-रचना-रम्यां प्रशस्तिं व्यधात् ॥ 25

एषा प्रशस्तिरुत्कीर्ण्णा वामनेन तु शिल्पिना ।
राजावर्त्तस्य सापत्न्यन्दधाने प्रस्तरोत्तमे ।। 26

1. From the facsimile in *Ep. Ind*., IX.
2. Symbol for *siddham*, *siddhir=astu* or *Oṁ siddhiḥ*.
3. *V* is used for *b* throughout the record.
4. Read *svaḥ*.
5. Venkayya suggests *°t=tyājayantī* which may have been intended; but *ntyā* is clear; cf. *dushṭān=Turu°* for *dushṭāt=Turu°* in l. 18.
6. Read *°dharm-ādvaita*.
7. Read *prakhyāto*.
8. Read *svayambhuvā*.
9. The name *Kumāradevī* may have been made *Kumaradevī* owing to the requirement of the metre. Cf. *api māshaṁ mashaṁ kuryāch=chhando-bhaṅgaṁ tyajed=girām*. But more probably this is due to her Southern origin because *Kumāra* becomes *Kumara* in South Indian pronunciation. The queen was compared to the goddess Tāriṇī for her dark complexion.
10. Read *sudhāṁśo°*.
11. Read *yāṁ Vedhāḥ*.
12. Read *sundarimā*.
13. Read *vismaya°*.
14. Read *°m=asmādṛiśaiḥ*.
15. Read *bibhrāṇā*.
16. Read *°r=netrā°*.
17. Read *natir=jano°*.
18. Read *sthitir=nitya°*.
19. Read *°ś=Chandra-nāmā*.
20. Read *vāhaiḥ*.
21. Read *nūna°*.
22. Read *tejo*.
23. Read *dushṭāt-Turu.°*
24. Read *°bhujaḥ*.
25. Read *°bhavad=ghāsa*.
26. Read *virūḍha*.
27. Read *tri-jagati*.
28. *Vīhāra* is an alternative form of *vihāra*. Jambukī was a *Pattalikā*, i.e. officer in charge of the *pattalas* or documents.
29. Read *Pattalik-ā°*.
30. Read *dharma°*.
31. Read *khalas=taṁ*.
32. Read *°jjvala°*.
33. Read *mahībhujaḥ*.

No. 21 Machhlīshahr Copper-plate Inscription of Hariśchandra, [Vikrama] year 1253 (1196 A.D.)

Kotwā, Machhlīshahr Tahsil, Jaunpur District, U.P.
Hirananda Sastri, *Ep. Ind.*, X, pp. 95 ff.

Language : Sanskrit.
Script : Early Nāgarī.

Metres: V.1 अनुष्टुभ्; V.2 इन्द्रवज्रा; V.3 अनुष्टुभ्; V.4 शार्दूलविक्रीडित; Vv.5-6 वसन्ततिलक; V.7 शार्दूलविक्रीडित; V.8 वसन्ततिलक; V.9 द्रुतविलम्बित; V.10 मालिनी; V.11 वसन्ततिलक; V.12 शार्दूलविक्रीडित; V.13 स्रग्धरा; V.14 वसन्ततिलक; V.15 स्रग्धरा; V.16 वसन्ततिलक; Vv.17-25 अनुष्टुभ्; V.26 शालिनी; V.27 इन्द्रवज्रा; V.28 वसन्ततिलक.

Summary : There was the illustrious YAŚOVIGRAHA. His son was MAHĪCHANDRA. His son, the illustrious *Paramabhaṭṭāraka Mahārājādhirāja Parameśvara* CHANDRADEVA, obtained the sovereignty of GĀDHIPURA or KANYAKUBJA by virtue of his own prowess. Meditating on his feet was *P.M.P.* MADANAPĀLA; meditating on his feet was *Aśvapati-Gajapati-Narapati-Rājatrayādhipati P.M.P.* GOVINDACHANDRA; meditating on his feet was *P.M.P.* etc. VIJAYACHANDRA; meditating on his feet was *P.M.P.* etc. VIJAYACHANDRA; meditating on his feet was *P.M.P.* etc. HARIŚ-JAYACHCHANDRA; meditating on his feet was *P.M.P.* etc. HARŚICHANDRA CHANDRA. While residing at DHANAṀVAKRA, HARŚICHANDRA granted, after having bathed in the GANGES at the bath- ing Ghāṭ called CHYAVANEŚVARA, the village of PAMAHAI together with some other hamlets to one RĀHĪHĪYAKA, son of *Ṭhakkura* MADANŪ of the Kāśyapa-gotra.—The charter was written by the *Mahākshapaṭalika Ṭhakkura* BHOGĀDITYA. The date of the grant is given as SUNDAY THE 15TH TITHI OF THE BRIGHT HALF OF THE MONTH OF PAUSHA in [Vikrama] SAṀVAT 1253 (5TH JANUARY, 1197 A.D.). About this time, the Turkish Muslims appear to have been in occupation of the cities of the Gāhaḍavala kingdom, though the Gāhaḍavala king's rule must have been acknowledged in the rural areas.

TEXT[1]

1. १ॅ[3] अकुंठोत्कंठ-वैकुंठ-कंठपीठ-लुठत्करः ।
[संरं]भ[ः] [सु]र[तारं]भे स [श्रि]यः श्रेयसे(ऽ*)स्तु वः ॥ 1
आसीदशीव(त)द्युति-वंस[4]-जातः
क्ष्मापाल-मालासु दिवं गतासु ।
सा[क्षा]द्विवस्वानि(व*) भूरि-धा[म्ना]
2. नाम्ना यसो[5][वि]ग्रह इत्युदारः ॥ 2
तत्सुतो(ऽ*)भून्महीचंद्र[ः](श्)चंद्रधाम-निभं निजं(जम्) ।
येनापारमकूपार-पारे व्यापारितं यशः ॥ 8
तस्याभूत्तनयो नयैकरसिक(ः*) क्रांत-द्विषन्मण्डलो
3. वि[ध्वस्तो]द्धत-वीर-योध-तिमिरः श्री-चन्द्रदेवो नृपः ।
येनोदारतर-प्रताप-समिताशेष[6]-प्रजोप[द्र]वं
श्रीमद्गाधिपुराधिराज्यमसमं दोर्व्विक्रमेणार्जितं(तम्) ॥ 4
तीर्थानि कासि-कुसिको-[7]
4. [त्त]रकोसलेंद्र-
स्थानीयकानि परिपालयताधिगम्य ।
हेमात्म-तुल्यमनिशं ददता द्विजे[भ्यो]
येनांकिता वसुम[ती] शत(श*)स्तुलाभिः ॥ 5
तस्यात्मजो मदनपाल इति क्षितीं[द्र]-
श्चूडामणिर्व्विजयते निज-गो-
5. त्र-चंद्रः ।
यस्याभिषेक-कलसोल्लसितैः पयोभिः
प्रक्षालितं [कलि]-रजः-पटलं धरित्र्याः ॥ 6
यस्यासीद्विजय-प्रयाण-समये तुंगाचलोच्चैश्चल-
न्माद्यत्कुंभि-पदक्रमासम-भर-भ्रस्य-[9]
6. न्मही-मंडले ।
चूडारत्न-विभिन्न-तालु-गलित-स्त्यानाश्रृ[10]गुद्भासितः
शेषः पेष-वसा[11]दिव क्षणे[12]मसौ क्रोडे विलीनाननः ॥ 7
तस्मादजायत निजायत-वा(बा)हु[13]-वल्लि-
वद्धा-[14]
7. वरुद्ध-[न]व-वाज्य[15]-गजो नरद्रः[16] ।
[सां]द्रामृत-द्रव-मुचां प्रभवो गवां यो

गोविंदचंद्र इति चंद्र इवाम्वुरासे.[17] ॥ 8

न कथमप्यलभन्त रणक्षमां-
स्तिसृषु दिक्षु गजानथ वज्रिणः ।
क-

8. कुभि पत्न[18]मुरभ्रमु-वल्लभ-
प्रतिभटा [इव] यस्य य[19]टा-गजाः । 9

अजनि विजयचंद्रो नाम तस्मान्नरे(रें)द्रः
सुरपतिरिव भ[20]भृत्पक्ष-विच्छेद-दक्ष(:*) ।
भुवन-दलन-हेला-हर्म्म(र्म्यं]-हस्वीर[21]-ना-

9. री-
नय(न)-जलद-धारा-धौत-भूलोक-तापः ॥ 10

लोक-त्रयाक्रमण-केलि-विशृंखलानि
[प्रख्या]त-कीर्त्ति-कवि-वर्ण्णित-वैभवानि ।
यस्य त्रिविक्रम-पद-क्रम-भांजि भान्ति
प्रो[ज्जृं]भय[न्ति] व(ब)लि-

10. राज-भयं यसांसि[22] ॥ 11

तस्मादद्भूत-विक्रमादथ जयच्चंद्राभिधानः पति-
र्भूपानामवतीर्ण्ण एष भुवनो[द्ध]ा[र]ाय नारायणः ।
द्वैधीभावमपास्य विग्रह-रुचिं धिक्कत्य[23] सान्तासयाः[24]
सेवन्ते यमुदग्र-

11. व(ब)न्धन-भय-ध्वंसार्थिनः पार्थिवाः ॥ 12

ग[च्छे]न्मू[र्च्छाम]तु[च्छां] न य[दि] [क]वलयेत्कू[र्म]-पृष्ठाभिघात-
प्रत्यावृत्तं[25]-श्रमार्त्तो नमदखिल-फणास्वाम[26]-वात्या-सह[श्रं][27] ।
उद्योगे यस्य धावद्धरणिधर-धुनी-निर्झ-

12. र-स्फार-धारा-
अस्य[28]द्दान-द्विपाली-व(ब)हुल-भर-गलद्धैर्य-नुद्रः[29] फणीन्द्रः ॥ 13

[यस्मि]श्चलत्युदधि-नेमि-मही-जया[र्थं]
माद्यत्करीन्द्र-[गु]रु-भार-[नि]पीडितेव ।
याति प्रजापति-पदं स[30]रणार्थि-

13. नी भू-
[स्त्वं]गत्तुरं[ग]-निवहोत्थ-रजश्छ[लेन] ॥ 14

तस्मादा[31]शीदसीम-त्वर-तुरग-खुर-क्षोद-विक्षि[प्त]-धूलि-
व्याप्त-[क्ष्मा]-चक्रवाल-क्रम-कलित-नभो-रुद्ध-सूर-प्रकासः[32] ।
सेनासं-
14. भार-संपद्दर-[वि]दलदिलां दोर्गमां तां [नरें]द्र-
श्चं[द्रार्क]–U–यि स्फुरदसम-[य]शाः श्री-हरिश्चंद्रदेवः ।। 15
येन प्रणा[म]-पतिन[33]-क्षितिपाल-मौलि-
रत्न-प्रभा-रुचिर-चारु-पदांवु(बु)-
15. जेन ।
उ[द्धं[34]]ड-शीतकर-मंडल-पुंडरीक-
[डिं]डीर-पिं[डमिव] [शुभ्रय]सो[35] वितेने ।। 16
सो(ऽ*)यं सम[स्त]-राज-च[क्र-सं]सेवित-चरणः स च परमभट्टारक-म-
[हा]राजाधिराज-परमेस्वर[36]-प[र]ममा-
16. हेस्वर[37]-निजभुजोपार्जित-[श्री]-कन्यकुव्जा(ब्जा)धिप[त्य]-श्री-चंद्रदेव-पा-
[द]ानुध्यात -परमभट्टारक-महाराजाधिराज-परमेस्वर[36]-प[र]ममाहेस्व[37]-
[र]- श्री-मद[न]पालदेव-[पा]दानुध्यात-परमभट्टारक-महाराजा-
17. धिराज-परमे[श्व]र-परममाहे[श्व]रा[श्व]प[ि[त]-गजपति - नरपति -राज-
[त्र]याधिपति-विविध - विद्या - विचार-वाचस्पति-श्री- [गो]विंदचंद्रदेव-
पादानुध्या[त]-परमभट्टारक-महाराजाधिराज-परमे[श्वर]-
18. परममाह[37][श्व]राश्वपति-गजपति-नरप[ति]-राजत्रयाधिपति - विवि[ध]-
[वि]द्या-विचार-वाचस्पति-श्री-विजयचंद्र[दे]व- पादानुध्यात-परमभट्टारक-
महाराजधिराज-परमे[श्व]र-परममा-
19. हे[श्व]राभ्य[38]पति-गजपति-नरपति-[राज]-त्रयाधिपति-विविध-विद्या-विचा-
[र]- वाचस्पति- श्री- जयच्चंद्रदेव- पादानुध्यात-परमभट्टारक- महाराजा-
धिराज-पर[मेश्व]र-परममाहे[श्व]रास्व[38]पति-
20. गजपति-नरपति-राज[त्र]याधिपति-विविध- विद्या-विचा[र]- वाचस्प[ति]-
श्रीम[त्[39]]हरि[श्चंद्र]देवो विजयी ।। [हा]लपांगि[क-अगहल]-[महा]-
सपाटक-पमहैग्राम-निवासिनो निखिल-जनप-
21. दानुगतानपि[40] च राज-राज्ञी-यु[व]राज-[मं]त्रि-[पुरो]हित-[प्र]ती[हा]-
र-साम[न्त]-सेनापति- भांडागारिकाक्षपटलिक-भिषग्नैमि[त्ति]कान्तःपुरिक-
करि-तुरग-दूत-पत्तनाकरस्थान-[गो]कुलाधिकारि-पु-
22. रुषानाज्ञ[41]पयति [वो(बो)]धयत्यादिशति च (।*) विदितम[स्तु] भवतां
य[थोप]रि-लिखित-[ग्रा]मः स-जल-स्थलः स-लोह-लवणाकरः स-म-

[त्स्य]ाकरः स-गर्तोवर[42]-साम्र-मधूक-वन-विटप-वाटिका-तृ[ण]-यूति-
23. गोचर-पर्यन्तः सोद्धाधः[43] चतुरघाट-विसद्धः[44] स्व-सीमा-पर्यन्तः त्रिपंचा-
श[45]ताधिक-द्वादशशत-संवत्सरे पौष-मा[सि] पौ[46]ि[र्ण]मायां रवि-दिने
अङ्के(ऽ*)पि संवत[47] १२५३ पौ[ष]-शुदि १५ रवौ अद्येह श्री-
24. मत[48]धनंवक्र-समावासे च्यवनेस्व[49]रघट्टे गंगायां स्नात्या[50] विधि[51]वन्यंत्र-
देव-मुनि-[मनु]ज-[भू]तग[णां]स्तर्प[यि]त्वा नि[खि]ल-पुत्य[52]-यसाभि[वृद्ध]ये
गोकर्ण-कुश[ल]ता-पूत-करतलोदकमस्मा[भिः]
25. कास्यपगोत्राय[53] ठक्कुर-सोपाल-पौत्राय ठक्कुर-मदनू-पुत्राय रा[ही]ही[य]-
काय आचंद्रार्क्कं या[वच्छा]सनीकृत्य पि[तृ[पितापहोपार्ज्जित-त[ङ्का]महारा-
गामं[54] भंडारी-रतनूकेन संप्रति गु-
26. डान्तीकृत्य वृत्ति वहिःकृ[त्य] प्रदत्तो मत्वा यथा-दीयमान-भाग-भोग-
कर-प्रवणिकर-जलकर- लवणाक[र]-प[र्णा]कर-दागपसदी - दीर्घगोविंछा-
(?)-नियतानियत-प्रभृति-समस्तादा[या]नाज्ञाविधेयीभू-
27. य दास्यथ ॥ भवन्ति चात्र श्लोकाः ॥
भूमिं यः प्रतिगृ[ह्णा]ति [य]श्च भूमिं [प्र]य[च्छ]ति ।
[उ]भौ तौ पुन्य-[55]कर्माणौ नियतं स्वर्ग-[ग]ामिनौ ॥ 17
संखं[56] भद्रासनं छत्रं वरास्वा[57] वर-वारणाः (।*)
भूमि-दानस्य[59]
28. चिह्नानि फलमेत[त्पु]रंदर ॥ 18
षष्टि-वर्ष-सहश्राणि[59] [स्वर्गे] ति[ष्ठ]ति भूमिदः ।
आ[च्छे]त्ता चानु[मंता च ता]न्वेव[60] नरके वसेत[61] ॥ 19
व(ब)हुभिर्वसुधा भुक्ता राज[भिः] सगरादिभिः ।
यस्य
29. यस्य यदा भूमिस्तस्य तस्य त[दा] फलम् ॥ 20
स्व-दत्तां प[र]-दत्तां वा यो हरेद्व[सुं]धरां[62] ।
स विष्ठायां कृमि [भूत्वा] पितृभिः सह मज्जति ॥
गामेकां स्वर्णमे[कं] (वा*) भूमर[63][प्ये]कमंगुलं(लम्) ।
हरन्नरक-
30. मवाप्नोति यावदा[भू]त-संप्लवं(वम्) ॥ 22
तडाग(गा)नां सहस्रेण वाजपेय-शतेन च ।
गवां कोटि-प्रदानेन भूमि[हर्त्ता न] सु[64][ध्य]ति ॥ 23
वारि-ही[ने]व्यरण्येषु[65] सुष्क[66]-कोटर-वासिनः ।
कृस्न[67]सर्पाश्च जायन्ते

31. देव-व्र(ब्र)ह्म-(स्व*)-हारिणः ॥ 24
न विषं विषमित्या[हु]र्व्र(र्ब्र)हा(ह्म)-स्वं विषमुच्यते ।
विषमेकाकिनं हन्ति [व्र(ब्र)ह्म]-स्वं [पुत्रपौत्रि]कं(कम्) ॥ 25
सर्व्वानेतान् भाविनः पार्थिवेन्द्रा(न्*)
भूयो भूयो याचते राण[68][भ]द्रः ।
32. सा[मा]न्यो(ऽ*)यं धर्म-सेतु[69]र्नृपाणां
काले काले पालनीयो भव[द्भि]ः ॥ 26
यानीह दत्तानि पुरा नरेन्द्रै-
र्दाना[नि धर्मार्थ]-यशस्कराणि ।
निर्मा[ल्य]-वान्त-प्रतिमानि तानि
को नाम साधुः पु-
33. नराददीत ॥ 27
वाताभ्र-वि[भ्रम]मिदं वसु[धा]धिपत्य-
मापातमात्र-मधुरा विषयोपभोगाः ।
प्राणा[स्तृ]णा[ग्र-ज]लविन्दु-समा नराणां
धर्मः सखा परमहो परलाक[70]-[या]ने ॥ 28
लिखितं चेदं [ता]म्र-पट्टकं महाक्षपटलिक-ठक्कुर-श्री-भोगादित्यैरिति ॥

---

1. Jayachchandra's Kamauli plate of Vikrama 1232 (10th August, 1175 A.D.) records a gift made by the king on the occasion of the *jāta-karman* (the birth-ceremony before the navel-string is cut) of his son Hariśchandra. Another record of Jayachchandra refers to the *nāma-karaṇa* (name-giving) ceremony of Hariśchandra, which took place on the 31st August, 1175—just three weeks after the child's birth. Hariśchandra seems to have ascended the throne after the death of his father in 1193 A.D. in the battle of Etawah against Muizuddīn Muḥammad bin Sām. The Belkharā inscription dated Vikrama 1253 or 1257 is also supposed to be a record of Hariśchandra's reign. See *JASB*, 1911, pp. 763 ff.
2. From the facsimile in *Ep. Ind.*, X.
3. Symbol for *siddham*, *Oṁ siddhiḥ* or *siddhir=astu*.
4. Read *vaṁśa*.
5. Read *yaśo°*.
6. Read *śami°*.
7. Read *Kāśī-Kuśi°*.

8. Read *chūḍā°*.
9. Read *bhraśya°*.
10. Read *°sṛig-u°*.
11. Read *vaśā°*.
12. Read *kshaṇa°*.
13. *B* has throughout been indicated by the sign for *v*.
14. Read *bandhā°*.
15. Read *rājya*.
16. Read *nareṁdraḥ*.
17. Read *°mbu-rāśeḥ*.
18. Read *babhramur=a°*.
19. Read *ghaṭā°*.
20. Read *bhūbhṛit-paksha*.
21. Read *Hammīra* or *Hambīra*.
22. Read *yaśāṁsi*.
23. Read *dhikkṛitya*.
24. Read *śānt-āśayāḥ*.
25. Read *°vṛitta*.
26. Read *phaṇā-śvāsa*.
27. Read *sahasram*.
28. Read *bhraśya°*.
29. Read *mudraḥ*.
30. Read *śaraṇ-ārthinī*.
31. Read *tasmād=āsī°*.
32. Read *prakāśaḥ*.
33. Read *patita*.
34. Read *uddaṁḍa*.
35. Read *yaśo*.
36. Read *parameśvara*.
37. Read *māheśvara*.
38. Read *°śvar-Āśvapati*.
39. Read *śrīmad-Dhari*.
40. Read *°dān=upagatān=api*.
41. Read *°n=ājñāpayati*.
42. Read *°gartt-osharaḥ*.
43. Read *s-orddhv-ādhaḥ*.
44. Read *viśuddha*.
45. Read *pañchāśad-adhika*.
46. Better read *pūrṇṇimāyāṁ*.
47. Read *saṁvat*.
48. Read *śrīmati*.
49. Read *°śvara*.
50. Read *snātvā*.
51. Read *vidhivan-mantra°*.
52. Read *puṇya-yaśo°*.
53. Read *Kāśyapa*.

54. Read *grāmaṁ Bhāṇḍāri°*. The meaning of the following passage is not quite clear.

55. Read *puṇya*.

56. Read *Śaṁkhaṁ*.

57. Read *var-āśvā*.

58. Read *dānasya*.

59. Read *sahasrāṇi*.

60. Read *tāṇy=eva*.

61. Read *vaset*.

62. Read *hareta vasundharām* to satisfy the metre.

63. Read *bhūme°*.

64. Read *śudhyati*.

65. Read *°shv=araṇyeshu*.

66. Read *śushka*.

67. Read *kṛishṇa*.

68. Read *Rāma°*.

69. Read *setur=nṛipā°*.

70. Read *para-loka*.

Chapter II

CENTRAL INDIA

A--The Pāṇḍuvamśīs

No. 22--Rājim Copper-plate Inscription of Tīvara (c. 580-95 A.D.), Regnal year 7

Rājim, Raipur District, Madhya Pradesh
Fleet, *Corp. Ins. Ind.*, III, pp. 294-96.

Language : Sanskrit.
Script : Box-headed variety of Late Brāhmī.
Metres : V. 1 अनुष्टुभ् (श्लोक); V. 2 आर्या; V. 3 वसन्ततिलक; V. 4 अनुष्टुभ् (श्लोक.) V. 5 इन्द्रवज्रा; Vv. 6-8 अनुष्टुभ् (श्लोक).

Summary : From Śrīpura (mod. Sirpur in the Raipur Dist., M.P.) in the 7th year of his reign, on the eighth of Kārttika, *Mahārāja* Tīvaradeva, who was the lord of Kosala and the son of Nannadeva, the son of Indrarāja of the Pāṇḍu lineage, informed the residents of the village of Pimparipadraka in the Peṇṭhāma-bhukti that, on the 12th lunar day of the month of Jyeshṭha, the said village had been granted to Bhaṭṭa Bhavadatta and Bhaṭṭa Haradatta who were the sons of Bhaṭṭa Gaurīdatta. The donees were allowed to enjoy the hidden treasures and deposits and *Daradraṇaka* (?) while the *Chāṭas* and *Bhaṭas* (prabably policemen and the leaders of their groups) were forbidden to enter the gift village.

TEXT[1]

Seal

1. श्रीमत्ति(त्ती)वरदेवस्य कोसलाधिपतेरिदं(दम्) (।*)
2. शासनं धर्म्म-वृद्ध्यर्थं[·] स्थिरमाचन्द्रतारकं(कम्) (।।*) 1

First Plate

1. १[२]
जयति जगत्र[3]य-तिलक(:*) क्षितिभृत्कुल-भवन-मङ्गल-स्तंभ(:* ।)* श्रिमत्तिवरदेवो[4] धौरेय(:*) स-

2. कल-पुण्य-कृतां(ताम्) (॥*) 2
स्तस्ति[5] (॥*) [6]शिपुरात्समधिगत-पञ्चमहाशब्दानेक-नत-नृपति-किरिट-[7]

3. कोटि-घृप्ट[8]-चरण-नख-दर्पणोद्भासितो(ऽ*)पि कण्ठदुन्मुख-प्रकट-रिपु-राज-लक्ष्मि-[9]

4. केशपाशाकर्षण-दुर्ललित-पाणिपल्ल(वो*) निशित-निस्तृङ्‌श[10]-घन-घात-पातितारि-द्विरद-कु-

5. म्भ-मण्डल - गलद्व[11]हल - शोणित - सदासिक्त - मुक्ताफल-प्रकर-मण्डित - रणाङ्गण-

6. [12]द्विविध-रत्न-संभ[ा[र-लाभ-लोभ- विजृम्भमाणारि-क्षारवारि-वाडवा-नलश्चन्द्रोदय इवाकृत-

7. करोद्वेगः क्षिरोद[13] इवाद्वि[14]भूतानेकातिशायि-रत्न-सम्पत् गरुत्मा-निव भुजङ्गोद्धार-चतुर(:*)

8. परामृष्ट-गत्रु[15]-कलत्र-नेत्रांजन-कोमल-कपोल—कुङ्कुमपत्रभङ्गत् शिष्टा-चार-व्यवस्था-[16]

9. परिपालनैक-दत्त-चित्त(:*) (।*) अपि च प्राक्तने तपसि यशसि रहसि चेतसि चक्षुषि ब[पु]-[17]

Second Plate, First Side

10. षि च पूजितो जनेनाक्लिष्टतया नितान्तमवितृप्तो गूडो[18] गाड-[19] स्वच्छ-प्रसन्नयद[20]-

11. नेन चालङ्कृत(:*)स्वामि-भवन[21]प्यबहु-लपनो(ऽ*)नुज्झितः कु-तृष्णो-(ऽ*)पि नितान्त-त्या-

12. गि[22] रिपुजन-प्रचण्डो(ऽ*)पि सोम्य[23]-दर्शनो भूति-विभूषणो(ऽ*)प्यपरुषः स्वभाव(तः*) कि-

13. ञ्चासन्तुष्टो धर्मार्जने न सम्पल्लाभे स्वल्प(:*)क्रोधे न प्रभावे लुब्धो यशसि न प-

14. र-वित्तापहारे स[क्ल]:[24] सुभासितेषु[25] न कामिनि-क्रिडासु[26] प्रतापानल-दग्धाशेष-

15. रिपुकुल-तूलराशिस्तुहिनशिलाशैल-धवल-यशोराशि-प्रकाशित-दिगन्त(:*) कान्त(:*) प्रकृत्या

16. शिृ [27]मदिन्द्रबल-सूनोरलङ्कृत-पाण्डुवङ्शस्य श्रि-तन्नदेवस्य तनयप्राप्तः[28]
स्वपुन्य-[29]

17. संभार- प्रस[30]मिताशेष-जगदुपद्रवः स्व-प्रज्ञा-शूचि[31]-समुद्धृताखिल-
कण्टकः पर-

18. मवैष्णवो मातापितृ-पादानुध्यातः श्री-महाशिव-तिरराजः[33] कुशली ॥
पेण्ठामभुक्तीय-

Second Plate, Second Side

19. पिम्परिपद्रके ब्राह्मणां[34] संपूज्य प्रतिवासिनः समाज्ञापयति (।*) विदि-
तमस्तु

20. भवतां यथास्माभिरयं ग्रामो यावद्रवि-शशि-तारा-किरण-प्रतिहत-
घोरान्धकारं ज-

21. गदवतिष्ठते तावदुपभोग्य(:*) स-निधिः सोपनिधिः[35]रचाट-भ[ट]-
प्रवेश[36] दा-

22. रद्रणक-सर्व्व-करादान-समेतो [माता]-पित्रोरात्मनश्च पुण्याभिबृ[37]द्धये
भा-

23. रद्वाज-सगोत्र-वाजसनेय-माध्यन्दिन-भट्ट-गौरिदत्तपुत्र-भट्ट-

24. भवदत्त-भट्ट-हरदत्ताभ्यां ज्येष्ठ-द्वादश्यामुदक-पूर्वं प्रतिपादित इ-

25. त्यवगम्य भवद्भिर्यथोचितमस्मै[38] भोग-भागमुपनयद्भिः सुखम्प्रति-

26. वस्तब्यमिति[39] ॥ भाविनश्च भूमिपालानुद्दिश्येदमभिधीयते(।*)
भूमि-प्र-

27. दा दिवि ललन्ति पतन्ति हृन्त[40]
हृत्वा महि[41] नृपतयो नरके नृशङ्साः(शंसाः) (।*)

Third Plate

28. एतद्वय[42] परिकलय्य चलाञ्च लक्ष्मि-[43]
मायुस्तथा कुरुत यद्भवतामभिष्ट[·][44] (॥*) 3

29. अपि च (।*)
रक्षा-पालनयोस्तावत्फलं सुगति-दुर्गति(ती) (।*)
को नाम स्वर्गमुच्छृज्य[45]
नरकं प्रतिपद्यते (॥*) 4

30. ब्यास-[46]गितांश्चात्र श्लोकानुदाहरन्ति[47] (।*)
'अग्नेर(प*)त्यं प्रथमं

31. सुवर्ण
भूर्वैष्णवि[48] सूर्य्य-सुताश्च: गाव: (।*)
दत्ता[49] त्रयस्तेन भवन्ति लोका
य: काञ्चनं गा-
32. ञ्च महि[ञ्च][50] दद्यात्(।।*) 5
षष्टि-वर्ष-सहस्राणि स्वर्गे मोदति भूमिद: (।*)
आक्षेप्ता
33. चानुमन्ता च तान्येव नरके वसेत् (।।*) 6
बहुभिर्वसुधा दत्ता राजभि: सगरादिभि: (।*)
34. यस्य यस्य भूदा भूमि[51] तस्य तस्य तदा फलं(लम्) (।।*) 7
स्व-दत्तां पर-दत्तां बा[52] यत्नाद्रक्ष
35. युधिष्ठिर:[53] (।*)
महि[54] महिमतां श्रेष्ठ दाना[55] श्रेयो(ऽ*)नुपालनमिति ।। 8
प्रवर्द्धमान-
36. विजय-राज्य-सम्वत्सरु[56] ७ कर्त्तिक-दिवसु अष्ठ(ष्ट)मु ८ (।।*)

1. From the facsimile in *Corp. Ins. Ind.*, III.
2. The *āñjī* symbol indicating *siddham*, *Oṁ siddhiḥ* or *siddhir=astu*.
3. Read *jagat-traya*.
4. Read *Śrīmat-Tīvara°*. Long *ī* sign has been used only in a few cases in the record. The subscribed sign looks more like *r* than *ṛi*.
5. Read *svasti*.
6. Read *Śrīpurā°*.
7. Read *kirīṭa*.
8. Read *ghṛishṭa*.
9. Read *lakshmī*.
10. Read *nistriṁśa*.
11. Read *galad-bahala*.
12. Fleet suggested the correction *vividha*.
13. Read *kshīroda*.
14. Read *iv=āvi°*
15. Read *śatru*.
16. Read *vyavasthā*.
17. Read *vapushi*.
18. Read *gūḍho*.
19. Read *gāḍha°*.
20. Read *vadanena*.
21. Read *bhavane='py-a°*.
22. Read *tyāgī*.
23. Read *saumya*.

24. Read *śuklaḥ*.
25. Read *subhāshiteshu*.
26. Read *kāminī-krīḍāsu*.
27. Read *śrīmad-I°*.
28. Read *vaṁśasya śrī-Nannadevasya tanayaḥ prāpta-sakala-Kosal-ādhipatyaḥ* (cf. *Ep. Ind.*, VII, p. 105, text line 19). The defective passage in our record led Fleet to suggest that Tīvara was an adopted son of Nanna.
29. Read *puṇya*.
30. Read *praśamita*.°
31. Read *sūchi*.
32. Read *śrī*.
33. Read *Tīvararāja*.
34. Read *Brāhmaṇān*.
35. Read *°nidhir=a-chāṭa°*.
36. Read *praveśo*.
37. Read ° *vṛiddhaye*.
38. The correct word would be *ābhyām*, not *asmai*.
39. Read *vastavya°*.
40. Read *hanta*.
41. Read *mahīṁ*.
42. Read *etad=dvayaṁ*.
43. Read *Lakshmī*.
44. Read *°m=abhīshṭam*.
45. Read *°m=utsṛijya*.
46. Read *Vyāsa-gītā°*.
47. Fleet's transcript has *°n=udāraharanti*.
48. Read *°shṇavī*.
49. Read *dattās=traya°*
50. Read *mahīñ=cha*.
51. Read *bhūmis=tasya*
52. Read *vā*.
53. Read *Yudhishṭhira*.
54. Read *mahīṁ*.
55. Read *dānāch=chhreyo°*.
56. The *u* ending of *saṁvatsara*, *divasa* and *ashṭama* seems to be a vernacular termination as in Telugu. Better read *saṁvatsare* 7 *Kārttika-divase'=shṭame* 8.

B—The Śailas

No. 23—Ragholi Copper-plate Inscription of Jayavardhana II, Regnal year 3

Ragholi, Balaghat District, Madhya Pradesh
Hiralal, *Ep. Ind.*, IX, pp. 44 ff.

Language : Sanskrit.

Script : Siddhamātṛikā of about the 8th century A.D.

Metres : Vv. 1-3 शार्दूलविक्रीडित; V.4 इन्द्रवज्रा; Vv. 4-5 वसन्ततिलक; Vv. 6-8 अनुष्टुभ् (श्लोक).

Summary : The charter was issued by king Jayavardhana from the city of Śrīvardhanapura.—There was a king named Śrīvardhana in the Śaila dynasty; he was probably a devotee of Jayeśa of Mt. Kailāsa. His son was Pṛithuvardhana who conquered the country of the Gurjaras; in his family was born Sauvardhana; one of his three sons obtained a tract of land after having killed the Pauṇḍra king; another of the brothers killed the king of Kāśi and occupied the enemy's land; his son Jayavardhana I killed the king of the Vindhya and settled in the enemy's territory; his son was Śrīvardhana II, the lord of the Vindhya; his son was Jayavardhana II.—*Mahārājādhirāja Parameśvara* Jayavardhana II, called *Sakala-Vindhyādhipati*, addressed his subordinates and subjects in respect of the grant of the village of Khaddikā in the Kaṭeraka-vishaya in favour of the god Āditya-bhaṭṭāraka (Sun-god) installed by Chaṭṭulliha, on the occasion of the full moon of Kārttika. The charter was written by Mahāchaṇḍapāla on the 30th day of Kārttika in the king's 3rd regnal year.

TEXT[1]

Seal

1 श्री जयव-
2 र्द्धनदेवस्य(॥*)

First Plate

1. १ँ[2] स्वस्ति (॥*) श्रीवर्द्धनपुरात्(॥*)
कैलासाचल-तुङ्ग-शृङ्ग-
2. विपुल-द्रोणी-जयेश[3]-प्रभुः
प्रख्यातो भुवि शैलवं-
3. श-तिलकः श्रीवनोवर्द्धनो[4] यो नृपः ।
तत्पुत्रः पृथुव-
4. र्द्धनो निज-भुज-व्याकृष्ट-खड्ग[:] मुया[5]
देशं गौर्ज्जरमास-
5. साद सहसा विक्रांतिभिर्यस्ततः ॥ 1
तद्वंश-प्रभवो
6. व्यजीजनदलं सोवर्द्धनो[6] भूपति-
भूं-चक्र-क्र-
7. म-लव्ध(ब्ध)-विक्रम-यशः पुत्र-त्रयं त्वौरसं(सम्) ।
ते-
8. षामुर्ज्जित-वैरि-दारण-पटुं पौण्ड्राधिपं क्ष्माप-
ति·
9\.
हत्वैको विषयं तमेव सकलं जग्राह शौ-
यन्वितः ॥ 2
10\.
ताभ्यामन्यतमो विहत्य सहसा द-
र्पोद्धतं दारुणं
11\.
काशिं काशि-नराधिपं सित-

Second Plate, First Side

गुणो जग्राह जेता द्विषां(षाम्) ।
12\.
तत्पुत्रो जयवर्द्धने

13. ति-वचसा ख्यातो वरो भूभृतां
विन्ध्ये विन्ध्य-नरेशमेव
14. सुचिरं हत्वा चकार स्थिति(तिम्) ॥ 3
मातङ्ग-दान-क्षत-दीन-चे-
15 ष्टः
स(सं)वर्द्धितानेक-विशाल-वंशः।
विन्ध्येश्वरो विन्ध्य
16. इवाचल-श्रीः
श्रीवर्द्धनस्तस्य सुतो बभूव ॥ 4
तस्या-
17. त्मजः सकल-वैरि-विनाश-दक्षो
जातो महा-
18. गुण-निधिर्ज्जयवर्द्धनाख्यः।
लक्ष्मी-प्रगाढ-
19. परिरंभण-पीडिताङ्गं
दृष्ट्वा दिवं यमगमत्परु-
20. षेव कीर्त्तिः ॥ 5
परममाहेश्वरो मातापितृ-पादा-
21. नुध्यातः सकल-विंध्याधिपतिः महाराजाधिरा-
22. ज-परमेश्वर-श्री-जयवर्द्धनदेवः कुशली

Second Plate, Second Side

23. कटेरक-विषयीय-खद्दिकायां व्रा(ब्रा)ह्मणा(न्*)संपूज्य प्रति-
24. वासिनो(ऽ*)न्यांश्च कुटु[म्बि[7]]न। (नः)[8] समाहर्तृ-सन्निधातृ-प्रमुखां[9]
25. यथाकालाध्यासिनः सर्व-राजपुरुषां[10] विषय-पतीं-
26. श्च समाज्ञापयति विदितमस्तु भवता(·*) यथास्माभिर-
27. यं ग्रामः स-निधिः सोपनिधिः सर्व्व-करादान-
28. समेतः प्रतिषिद्ध-चाट-भट-प्रवेशः स-दशा-
29. पराधः सर्व्व-पीडा-विवर्जितः[11] चट्टुल्लिह-प्रतिष्ठि-
30. त-श्रीमदादित्यभट्टारकाय[12] अधिष्ठान-विज्ञप्तिकया
31. कार्त्तिक्यामुदक-पूर्व्वमाचन्द्रार्क्क-ग्रह-समकालोप-
32. भोगार्थं मातापित्रोरात्मनश्च पुण्याभिवृद्धये ता-
33. म्र[13]-शासनेन प्रतिपादित इत्यवगत[14] समुचित-भो-

Third Plate, First Side

34. ग-भागादिकं भक्ता[15] सुखं वस्तव्यं(व्यम्) ॥ तथा चोक्तं धर्म्म-
35. शास्त्रे ॥
व(ब)हुभिर्वसुधा दत्ता राजभिः सगरादि-
36. भिः ।
यस्य यस्य यदा भूमिस्तस्य तस्य तदा फलं(लम्) ॥ 6
37. षष्टिं वर्ष-सहस्राणि स्वर्ग्गे मोदति भूमिदः ।
आ-
38. च्छेत्ता चानुत(म)न्ता च तान्येव नरके वसेत् ॥ 7
स्व-द-
39. त्तां परदत्ता(त्तां) वा यो हरेत वसुन्धरां(राम्) ।
स-विष्ठा-
40. यां कृमिर्भूता[16] पितृभिः सह पच्यते ॥ 8
इति क-
41. मल[17]-दता[18]म्वुविन्दु-लोलां
श्रियमनुचिन्त्य मनुष्य-
42. जीवितं च (।*)
सकलमिदमुदाहृत(·*) च वुध्वा[19]
नहि पुरु-
43. षैः पर-कीर्त्तयो विलोप्याः ॥ 9
श्री-श्रीवर्द्धनदेव-
44. स्स्य[20] पाद-ष[ड्गो]ष[21]जीविना ।
श्री-महाचण्डपालेन लि-

Third Plate, Second Side

45. खितं शासनं शुभ[म्] । (॥*) 10
प्रवर्द्धमान-विज-
46. य-राज्ये सम्व[22] ३ कार्त्ति[क][23]-दिन ३०[24](॥*)

---

1. From the facsimile in *Ep. Ind.*, IX.
2. Symbol for *siddhaṃ*, *Oṁ siddhiḥ* or *siddhir-astu*.
3. Hiralal suggests the correction °*droṇija-vaṁśa* which according to him means the *Gaṅgā-vaṁśa*.

4. The engraver omitted *rddha* and made *vano* instead of *vardhano* which was then engraved separately. Read *Śrīvardhano*.

5. Read *purā*.

6. Probably *Sauvardhano*°.

7. The *akshara mba* is not properly formed. There is only a vertical stroke below *ma*. Hiralal reads *kuṭumina*°

8. The *daṇḍa* is unnecessary.

9. Read *pramukhān*.

10. Read *purushān*.

11. We may have °*rjjitaś=Chaṭṭu*°; but *sandhi* is not compulsory in prose composition.

12. Better read °*kāy=ādhishṭhāna*°.

13. Read *tāmra*°.

14. Read °*gatya*.

15. Read *bhuktvā*.

16. Read °*r=bhūtvā*.

17. Hiralal reads *kambala*.

18. Read *dal-āmbu-bindu*.

19. Read *buddhvā*.

20. Better read °*sya*.

21. Read *padm-opajī*°. The form of *dmo* is rather peculiar.

22. Read *saṁvat*.

23. The *akshara* in brackets is of a peculiar shape.

24. Hiralal reads 30; but the facsimile exhibits no trace of zero after 3.

C—The Chandellas

No. 24—Darbat Śāntinātha Image Inscription of the time of Kīrtivarman, [Vikrama] year 1132 (1075 A.D.)

Darbat near Mahobā, Hamirpur District, U. P.
D.C. Sircar, *Ind. Hist. Quart.*, XXX, pp. 183 ff.; cf. N.P. Chakravarti in *Arch. Surv. Ind.*, A.R., 1936-37, p. 92.

Language : Sanskrit.
Script : Early Nāgarī.
Metre : Verses 1-2 अनुष्टुभ् (श्लोक)

Summary : In the kingdom or during the sovereignty of Kīrtivarman, son of Vijayapāla, an image of Śānti (i.e. the Jina Śāntinātha) was installed by the *Śreshṭhins* Pāhila and Jījū who appear to have been two of the king's hereditary officers. This is the EARLIEST DATE of Kīrtivarman so far known although he must have ascended the throne some time before the death of Kalachuri Karṇa about 1071 A.D.

TEXT[1]

[A] 1. सिद्धम्[2] (।।*)
रु(रू)पं स्त्रे(श्रे)यस्करं सां(शां)तेर्व्वासवेन्दु-कृत-स्तुति(तेः) ।
स्त्रे(श्रे)ष्ठि-पाहि-
2. ल-जीजूभ्यां भक्त्येदं क(का)रितं भू(भु)वि ।। 1

[B] 1. पण्डिताचार्य-श्री-वासव-
2. चंद्रः प्रणमति जिनं(नम्) ।।

[C] 1. सूनोर्व्विजयपालस्य राज्ये श्री-कीर्त्तिवर्मणः ।
तत्कुलामात्य-
2. वृन्दस्य प्रतिमा संप्रतिष्टि(ष्ठि)ता ।। 2
संवत् ११३२ ।।०।। ।।

---

[1] From impressions. For an earlier Chandella inscription, see No. 14 above.

[2] Expressed by symbol which is also read as *Om*, *Oṁ siddhiḥ* or *siddhir=astu*.

No. 25—Garra Copper-plate Inscription (No. 1) of Trailokyavarman, [Vikrama] year 1261 (1205 A.D.)

Garra near Chhatarpur, Chhatarpur Dist., Madhya Pradesh. K.N. Dikshit, *Ep. Ind.*, XVI, pp. 274 f. (B).

Language : Sanskrit.

Script : Early Nāgarī.

Metre : Vv. 1-2 अनुष्टुभ्

Summary : In the family of the CHANDRĀTREYAS, which was hallowed by heroes like JAYAŚAKTI and VIJAYAŚAKTI, sprang *Paramabhaṭṭāraka Mahārājādhirāja Parameśvara* MADANAVARMADEVA. Meditating on his feet was *P.M.P.* PARAMARDIDEVA; meditating on his feet was *P.M.P. Paramamāheśvara* TRAILOKYAVARMADEVA, the lord of KĀLAÑJARA. —To *Rāuta* SĀMANTA (or Sāvanta), son of *Rāuta* PĀPE (who had been killed at KAKAḌĀDAHA in a battle with the TURUṢKAS or Muhammadans), grandson of *Rāuta* Sahaṇapāla and great-grandson of *Rāuta* Raṇapāla, the king granted as 'maintenance for death' the village of KĀDOHĀ in the PĀṆIULI-VISHAYA on FRIDAY the SECOND *tithi* of the BRIGHT fortnight of VAIŚĀKHA in [VIKRAMA] SAṀVAT 1261. The *Mahattaras*, etc., were informed that the village was granted together with land and water, movable and immovable as well as overhead and underground objects and all the produce, and that the *Chāṭas* and others were prohibited to enter the gift village. The donee was allowed to enjoy *bhāga-bhoga*, the temples and walls, exit and entrance roads, sugarcane, *kārpāsa*, *kusuma*, *śaṇa*, *āmra*, *madhūka*, forests, mines, treasures, iron mines, *bāhya* and *ābhyantara ādāyas*, etc.—The DATE seems to correspond to the 22ND OF APRIL, 1205 A.D., the correct Vikrama year being 1262.

TEXT[1]

1. ९ँ[2] स्वस्ति (।*)
जयत्याह्लादयन्विश्वं विश्वेश्वर-शिरोधृतः ।
चन्द्रात्रेय-नरेंद्राणां वंशश्चन्द्र इवो-
2. ज्ज्वलः ।। 1
तत्र प्रवर्द्धमान-विरोधि-विजय-भ्राजिष्णु-जयशक्ति-विजय-
शक्त्यादि-वीराविर्भाव-भा-
3. स्वरे परमभट्टारक-महाराजाधिराज-परमेश्वर-श्री-मदनवर्म्मदेव-
पादानुध्यात-परमभट्टार-
4. क-महाराजाधिराज-परमेश्वर-श्री-परमर्द्दिदेव-पादानुध्यात-
परमभट्टारक-महाराजाधिराज-
5. परमेश्वर-परममाहेश्वर-श्री-कालञ्जराधिपति-श्रीमत्त्रैलोक्यवर्म्म-
देवो विजयी (।*) स एष दुर्व्विषहतर-प्रता-
6. प-तापित-सकल-रिपुकुलः कुलवधूमिव वसुन्धरान्निराकुलां परिपालयन्न-
विकल-विवेक-निर्म्म(ली*)कृत-मतिः
7. पाणिउलि[3]-विषयान्तःपाति-कादोहा[4]-ग्रामोपगतान्महत्तरादीन्सम्वो(म्बो)-
धयति समाज्ञापयति चास्तु वः
8. सम्विदितं[5] यथोपरिलिखितो(ऽ*)यं ग्रामः स-जल-स्थलः स-स्थावर-
जङ्गमः स्व-सीमावच्छिन्नः साध-ऊर्द्ध[6] भूत-
9. भविष्यद्वर्त्तमान-निःशेषादाय-सहितः प्रतिषिद्ध-चाटादि-प्रवेशश्चास्माभि-
र्व्वडवाड-ग्राम-समावासे[7] सं-
10. वत् १२६१ वैशाख सु[8]-दि २ सुक्र[9]-वारे भरद्वाज-गोत्राय रा।[10] रणपाल-
प्रपौत्राय रा ।[10] सहनपाल-पौत्राय ककड[ा]-
11. दहे [11] तुरुष्क-युद्धे मृत-रा ।[10] पापे-पुत्राय रा ।[10] सामन्त-
नाम्ने प्रशादेन[12] मृत्यु क-वृत्तौ शासनं कृत्वा प्रदत्त इति
12. मत्वा भवद्भिराज्ञा-स्रवण[13]-विधेयैर्भूत्वा भाग-भोगादिकं
सर्व्वमस्मै समुपनेतव्यं(व्यम्) । तदेनमस्य ग्रामं स-मंदिर-
13. प्राकारं स-निर्ग्गम-प्रवेशं स-सर्व्वानिक्षु-[14] कर्प्पास-कुशुम-[15]
सेणाम्र-मधूकादि-भूरुहं स-वन-खनि-निधानं स-
14. लोहाद्याकरमपरैरपि सीमान्तर्गतैर्व्वसुभिः सहितं
स-वा(बा)ह्याभ्यन्तरादायं भुंजानस्य न केनापि वाधा कार्य[ा](।*)
15. अत्र च राज-राजपुरुषादिभिः स्वं स्वमाभाव्यं परिहर्त्तव्य-
मिदञ्चास्मद्दानमनाच्छेद्यमनाहार्यञ्चेति भाविभिरपि भूमि-

16. पालैः पालनीयं(यम्) ॥
शंखं भद्राशनं छत्रं वरास्वा[17] वरवारणाः ।
भूमि-दानस्य पुप्यानि[18] फलं स्वर्ग्गः पुरंदर ॥ 2
स्व-हस्तो(ऽ*)यं राज्ञः[19]

1. From the facsimile in *Ep. Ind.*, XVI. In the centre of the upper part of the record, dividing ll. 1-4, is engraved a figure of seated Lakshmī with four arms, the upper two holding lotuses.

2. The symbol for *siddham* or *Oṁ siddhiḥ* or *siddhir=astu.*

3. Identified with modern Panna, capital of the Panna District, Madhya Pradesh.

4. Identified with Kādoa, just south of Garra.

5. Read *saṁvidita°*.

6. Read *°ūrddhvo*.

7. Identified with Beḍwāḍā in the Lalitpur Subdivision of the Jhansi District, U.P.

8. Better *śu°* (for *śuddha* or *śukla*).

9. Read *Śukra*.

10. I.e. Rāutta, Rāvata, Rājaputa or Rājaputra.

11. Kakaḍādaha, the scene of the battle with the Turks (i.e. Musalmans), has been identified with Kakaḍwā, a little to the south-east of Beḍwāḍā. Kakaradaha in the Vaḍavāri region is also mentioned in the Semra plates of Paramardin (*Ep. Ind.*, IV, p. 157).

12. Read *prasādena*.

13. Read *śravaṇa*.

14. Read *sa-sarvv-āśan-ekshu°* as in the Semra plates of Paramardin (*Ep. Ind.*, IV, p. 157).

15. Read *kuśuṁbha-śaṇ-āmra*. From *kuśuṁbha* (Beng. *kusum*) seeds oil is made and from its flowers is prepared a dye. *Śaṇa* (Being *śan*) is a fibrous plant, from which ropes are made.

16. Read *bhadrāsanaṁ*.

17. Read *var-āśvā°*.

18. Read *puṇyāni*.

19. One would expect *Trailokyavarmaṇaḥ* after *rājñaḥ*. The actual signature of the king was made on the original document on *bhurjapatra* or cloth. Sometimes the record was copied on the copper plates from drafts not containing the actual signature (as in the present case), but sometimes from the original grant containing the signature (as in the Banskhera plate of Harsha). There is no reason to believe that the letters at the bottom of the Banskhera plate are an eye copy of Harsha's signature.

D—The Kalachuris of Tripuri and Ratanpur

No. 26—Bilhāri Stone Inscription of Yuvarāja II

(c. 980-95 A.D.)

Bilhāri, Jabalpur District, Madhya Pradesh

Kielhorn, *Ep. Ind.*, I, pp. 254 ff.; Mirashi, *Corp. Ins. Ind.*, IV, pp. 204ff.

Language : Sanskrit

Script : Early Nāgarī

Metres V. 1 शार्दूलविक्रीडित; V.2 अनुष्टुभ् (श्लोक); V.3 शार्दूलविक्रीडित; V.4 स्रग्धरा; V.5 अनुष्टुभ्(श्लोक); V.6 शार्दूलविक्रीडित; V.7 स्रग्धरा; V.8 वसन्ततिलक Vv.9-10 शार्दूलविक्रीडित; V.11 द्रुतविलम्बित; V.12 स्रग्धरा; V.13 मालिनी; V.14 शार्दूलविक्रीडित; V.15 वसन्ततिलक; V.16 उपजाति; V.17 शालिनी; V.18 उपजाति; Vv. 19-20 स्रग्धरा; V.21 पुष्पिताग्रा; V.22 मालिनी; V.23 उपजाति; Vv.24-25 शार्दूलविक्रीडित; V.26 वसन्ततिलक; V.27 मन्दाक्रान्ता; V.28 शार्दूलविक्रीडित; V.29 स्रग्धरा; V.30 शिखरिणी; V.31 शार्दूलविक्रीडित; V.32 वसन्ततिलक; V.33 शिखरिणी; V.34 मालिनी; V.35 उपेन्द्रवज्रा; V.36 मन्दाक्रान्ता; V.37 शार्दूलविक्रीडित; Vv.38-40 वसन्ततिलक; V.41 इन्द्रवज्रा; V.42 उपजाति; V.43 आर्या; V.44 अनुष्टभ् (श्लोक); V.45 आर्या ; V.46 शार्दूलविक्रीडित; V.47 वसन्ततिलक; V.48 अनुष्टुभ्(श्लोक) Vv. 49-50 वसन्ततिलक; V.51 अनुष्टुभ्(श्लोक) ; V.52 उपजाति; V.53 अनुष्टुभ्(श्लोक); V.54 मालिनी; V.55 शार्दूलविक्रीडित; V.56 वंशस्थ; Vv.57-58 अनुष्टुभ्(श्लोक); Vv.59-60 मालिनी; V.61 अनुष्टुभ् (श्लोक); V.62 शार्दूलविक्रीडित; V.63 शिखरिणी; V.64 अनुष्टुभ् (श्लोक); Vv.65-71 शार्दूलविक्रीडित; V.72 अनुष्टुभ्(श्लोक); Vv. 73-76 मालिनी; Vv.77-78 अनुष्टुभ्(श्लोक); Vv.79-82 गीति; V. 83 शिखरिणी; V.84 आर्या(?); Vv. 85-86 आर्या.

Summary : The inscription begins with an adoration to ŚIVA.—In the family of the Moon-god, which was also the clan of the HAIHAYAS, there were BUDHA and others like ARJUNA (son of Kṛitavīrya) and DATTĀTREYA; there was KOKKALLA who conquered the whole earth and erected two pillars of victory in the forms of king KṚISHṆA in the south and king BHOJA in the north. These were Rāshṭrakūṭa Kṛishṇa II and Gurjara-Pratihāra Bhoja II. His son was MUGDHATUṄGA who snatched away PĀLĪ from the king of KOSALA and came into conflict with the GAUḌAS, KARṆĀṬAS, LĀṬAS and KĀŚMIRAS; his son YUVARĀJA I, also called KEYŪRAVARSHA, ruled over the tract of land surrounded by MT. KAILĀSA in the north, the SETU (Rāma's bridge) in the south and the eastern and western oceans; he married NOHALĀ who was the daughter of CHAULUKYA AVANIVARMAN, the son of SADHANVA and grandson of SIṀHAVARMAN; their son, LAKSHAṆARĀJA made some grants.—There was the Śaiva ascetic PAVANAŚIVA, the MĀDHUMATEYA (inhabitant of Madhumatī); after him came ŚABDAŚIVA; to his disciple ĪŚVARAŚIVA the villages NIPĀṆĪYA and AMBIPĀṬAKA were granted together with some other localities in the name of SMARĀRI (Śiva).—There was RUDRAŚAMBHU among the Śaiva SIDDHAS at KADAMBAGUHĀ; his disciple was MATTAMAYŪRANĀTHA who seems to have received a village from the king of AVANTI; his disciple was DHARMAŚAMBHU; his disciple SADĀŚIVA; his disciple MĀDHUMATEYA; his disciple CHŪḌĀŚIVA; his disciple HṚIDAYAŚIVA to whom LAKSHMAṆARĀJA dedicated the *maṭha* of VAIDYANĀTHA; having accepted it, the ascetic gave the NAUHALEŚVARA-MAṬHA to his disciple AGHORAŚIVA. The CHEDI king covered SOMEŚVARA with jewels and worshipped him with the wealth he obtained by defeating the kings of South KOSALA and OḌRA.—Lakshmaṇa's son ŚAṄKARAGAṆA became king and was succeeded by his younger brother YUVARĀJA II who was a great devotee of the god ŚIVA.—The eulogy of three kings (Kokkalla, Mugdhatuṅga and Yuvarāja I) was composed at first by ŚRĪNIVĀSA, son of Sthirānanda. The eulogy of three more kings (Lakshmaṇa, Śaṅkaragaṇa and Yuvarāja II) was then composed by SAJJANA, son of Thīra.—AGHORAŚIVĀCHĀRYA of the Nohaleśvara-maṭha brought the two compositions together. The concluding part of the record was written by *Kāyastha*

SĪRUKA. This part enumerates certain gifts such as '1 Shoḍaśikā (coin) per *khaṇḍikā* (weight) of salt', etc., at the customshouse at the town (*pattana-maṇḍapikā*).—The eulogy was written on the stone by NĀĪ, son of *Karaṇika* DHĪRA, and was engraved by NONNA, son of *Sūtradhāra* Saṅgama.

TEXT[1]

1. १[2] ओं नमः शिवाय ।।
पायाद्वः स समस्त-मंगल-निधिः शम्भोर्ज्जटाजूटको
य[स्मिँ]ल्लोल-लसद्यु[3]-मण्डल-गलन्मन्दाकिनी-वारिभिः ।
गाढ-ग्रन्थि-निपीडितोरग-पति[4]-प्रस्फार-फल्लत्फणा-
भीम-व्यावृत-वक्त्र-मारुत-धृतैः श्वेतातपत्रायितं(तम्) ।। 1
अपि च ।।
अव्याद्वश्चन्द्रचूडस्य लोचनार्च्चिष्मत शिखा (।*)
मित्रमेष स्मरस्येति दग्धुं विधुमिवोद्गता ।। 2
यं खेलाय षडाननः शिशुतया कृत्वा ग्रहं मार्गति
ग्रंथो यश्च

2. दुरोदरैः पुरभिदो देव्या समं दीव्यतः ।।[5]
केली-कोप-कथासु येन तनुते हेति-क्रियां पार्व्वती
पायाद्वः स जटावनैक-कुसुमं शार्व्वः सुधादीधितिः ।। 3
दिक्षु प्रेंखाभियोग-प्रवलित-वलना-विभ्रमाकाण्ड-चण्डै-
र्दोर्दण्डानां प्रकाम-प्रथिमभिरनिलैर्दूरमुत्सारितासु ।
किं च प्रस्फारचारी नमदवनिवशाद्व्योम्नि याते महत्ता-
मव्यादव्याहतेच्छं त्रिपुरविजयिनस्ताण्डवाड[6]म्वर-

3. म्वः[7] ।। 4
वन्शे[8](ऽ*)त्र सोम-संभूतौ वाचं निक्षिपता मया (।*)
हन्त हस्तैरुपक्रान्ता मोहेन वियतो मितिः ।। 5
वाचामुज्व[9]लिमापि नास्ति यदि मे तत्कीर्त्त्यमानोन्नते-
रस्मादेव महीयसः शशभृतो वंशात्स सम्पत्स्यते (।*)
यद्वा पश्य निसर्ग्ग-कालिम-भुवो(ऽ*)प्याशेभ-दान-च्छटाः
क्षीरोदन्वति किन्न सङ्गतिभृतस्तच्छायताम्विभ्रति[10] ।। 6
नेत्रादत्रेर्द्धरित्री-धवलन-सुहृदां धाम धाम्नामुदंच-
ल्लोकालोकं यदा-

4. प प्रभवमतलिन-ध्वान्त-विध्वन्स-[11]हेतुः ।
सो(ऽ*)यं सोमाभिधानस्तिलकयति कला मौलिमस्यैव शम्भो-
रस्मादेव प्रवृत्तः किमपरमयमप्यन्वयो हैहयानां(नाम्) ।। 7
अस्मिंश्च वन्द्यतमताङ्गमिते वु(बु)धाद्यै-
राद्यैर्नृपैर्नृपतिरर्ज्जुन इत्युदारः ।
आसीद्वि(द्वि)ष द्विपिन-कर्त्तन-कीर्त्तनीय-
कीर्त्तिच्छटाच्छुरित-दीर्घ-दिगन्तरालः ।। 8
यद्वक्षस्तट-ताडनातितरल-त्रुट्यत्पवि-प्रोच्छल-
ज्वला[13]मालि-क-
5. रालितेन करिणा देवाधिपः क्वाप्यगात् ।
लीलोल्लालित-[श]र्व्व[14]-पर्व्वतपतेस्तस्यापि लङ्कापते-
र्यद्वर-व्यवसायिनो यदभवत्ख्याति-प्रमाणं हि तत् ।। 9
दत्तात्त्रेय इति प्रकाम-कमला-लीलायितानाम्पदं
यो देवस्स सुत-प्रतिश्रुति-वचः-प्रीत्या यमन्वग्रहीत् ।
के वा तद्गुण-वर्ण्णने वयमहो किं फल्गुभिर्जल्पितै-
र्म्मन्ये सापि च वाग्वपुर्भगवती तत्त्र स्फुटं मुह्यति ।। 10
अथ तपस्तत-सत्पुरुष-व्रत-
व्रतति-पर्व्वततः कति ना-
6. भवन् ।
तरुण-तारक-राज-पराजय-
व्यसनि-[15]कीर्त्तिभुवः पतयो भुवः ।। 11
तेष्वेवन्स[16]म्भवत्सु क्रममनु मनुजाश्चर्यतामादधानो
धन्यानामेक-सीमा समुपनत-महीमण्डलाखण्डलाभः ।
जातः कोक्कल्लदेवो दलदहित-लता-दाह-दावायमानो
मानोत्तन्सस्य[17] यस्य त्त्रिभुवन-वलय-व्यापनो(ऽ*)भूत्प्रतापः ।। 12
भुवन-विजय-हेतोर्म्मुक्त-मर्यादयाद-
स्सदन-लडित-लोलैर्यद्वलैस्सम्वलद्भिः[18] ।
अतलिनतर-भार-भ्रश्यदुर्व्वी-
7. विषीद-
त्फण-फलक-कलापो भोगि-भर्त्ता व(ब)भूव ।। 13
श्यामाशङ्किभिराकुलैर्व्विजघटे चक्राह्वयानान्द्वयं-
रम्भोदागम-विभ्रमेण विदधे लास्योत्सवः केकिभिः ।
मग्नालोकमकाण्ड एव च दृशामान्ध्येन लेभे पदं
यत्सेना-रजसि क्रमादवनितस्तारापथे लुप्यति[19] ।। 14

वेलावन-प्रणयि-सैन्य-भरे च यत्त्र
मज्जद्भिराकुल-कुलाद्रि-निभैरिभेन्द्रैः ।
संभ्रान्त-मन्दर-गिरेस्समयस्य तस्य
कालाद्व(द्ब)होः स्मरणमाप निधिर्ज्जलानां(नाम्) ॥ 15
[यत]-

8. श्च वैन्ध्यन्तटमाददाने
दानेद्ध-सेनागज-भञ्जनेन ।
अमञ्जु-शिञ्जान-शकुन्त-चक्र-
ञ्चक्रन्द दुःखादिव वृक्षजालं(लम्) ॥ 16
जित्वा कृत्स्नां येन पृथ्वीमपूर्व्व-
ङ्कीर्त्ति-स्तम्भ-द्वन्द्वमारोप्यते स्म ।
कौम्भोद्भव्यांन्दिश्यसौ कृण्णराजः
कौवेर्याञ्च श्रीनिधिर्भोजदेवः ॥ 17
व(ब)भूव तस्मादथ मुग्धतुङ्ग-
स्तुङ्गस्त्रिलोक्यामपरो न यस्मात् ।
दिशश्च यः किञ्च विजेतुकामः
कामस्त्व शत्रुर्न्न भुवम्विलेभे[20] ॥ 18
शय्या संग्राम-लक्ष्म्याः पर-व(ब)ल-परिघः पल्लवः कोप-वल्याः[21]
प्रेयो दर्प्पस्य मित्त्रं सुचरित-सलि-

9. लस्येन्द्रनील-प्रणालः ।
शाखा शौर्य-द्रुमस्य प्रसरण-सरणिश्शाश्वती साहसाना-
मासीद्यस्यासिरेव प्रधन-परिकरारम्भिणः प्रीति-पात्त्रं(त्त्रम्) ॥ 19
वल्गद्वेताल-वर्ग्गं त्त्रुटित-निज-शिरोधारि-धावत्कव(ब)न्ध-
ण्डात्कुर्व्वड्डाकि-डिम्वं(म्बं)मुख-वि(बि)ल-विलसत्सम्मुखोल्कामुखोल्कं-
(ल्कम्) ।
मान्स[22]-ग्रासाभिलाष-स्वनदशिव-शिवा-भैरवाराव-रौद्रं
रौद्रं यो धाम वि(बि)भ्रत्प्रतिसमरमिति द्वेषि-चक्रञ्चकार ॥ 20
उपविपिन-भुवो निधेर्ज्जलाना-
मधिवसता कटकेन यस्य यातुः ।
अव-

10. चय-विचलद्वधू-कराग्र-
द्विगुणित-विद्रुम-पल्लवा व(ब)भूवुः ॥ 21

इह विहित-विलासा वीचयो वारिराशे-
रिह स वसति[23] वायुः केरली-केलिकारः ।
इह हरति भुजङ्ग[24]स्सौरभं भूरुहाणा-
मिति मलय-समीपे यद्विचाराः प्रचेरुः ॥ 22
विजित्य पूर्व्वास्वु(म्बु)धि-कूल-पालीः
पालीस्समादाय च कोसलेन्द्रात् ।
निरन्तरोद्वासित-वैरि-धामा
धामाधिकः खड्गपतिर्य आसीत् ॥ 23
गौडी-गाढ-मनो-मनोरथ-करः कर्ण्णाट-कान्ता-कुच-
क्रीडाशैल-तटी-विहार-हरिणो लाटी-ललाटाङ्कदः ।
काश्मी-

11. री-विहित-स्मर-व्यतिकरस्तस्मात्कलिङ्गाङ्गना-
सद्गान-व्यसनी स नीतिनयनः केयूरवर्षो(ऽ*)भवत् ॥ 24
आशापाल-पराजयाय जनित-त्त्रैलोक्य-शङ्का-पदं
सैन्यैर्यस्य युगान्त-केलि-कलनैर्द्दत्त-प्रयाणैरपि ।
न प्रोद्धूतिमय(वा)प पांशु-पटलं भूयो गृहीत-द्विष-
द्व(द्ब)न्दीवृन्द-वहद्विलोचन-पयःपूर-प्लुतायां भुवि ॥ 25
यस्संयति प्रकट-पाटित-कुम्भि-कुंभ-
मुक्ताफल-प्रचय-वाहमुवाह देवः ।
भूयो निपीत-दृढ-पीडन-वेग-वान्त-
विद्वेषि-कीर्ति-कण-कीर्ण्णमिवासि-दण्डं(ण्डम्)॥ 26
आ कैलासाद-

12. नलस-लसत्पार्व्वती-केलि-व(ब)न्धो-
रा च प्राचश्शिखरि-वरतो भास्वदुद्भास-भूमेः ।
आरात्सेतोस्तदनु पयसामा प्रतीचो(ऽ*)पि पत्यु-
र्यत्सेनानामहित-निहितानन्त-तापः प्रतापः ॥
प्रेंखात्क्षिप्र-खु[र]-[25]प्रघात-विगलत्कीलाल-लोलोल्लस- 27
द्वेताली-कर-यन्त्र-पीडन-वश-भ्रश्यत्कपालास्थिभिः ।
यस्तस्तार सविस्तरं रणभुवः कोपोत्कटाभिर्द्दव-[26]
द्व्रिप्त[27]-द्वेषि-शिरोभिरम्व(म्ब)र-चरी-नेत्त्र-त्त्रिभागार्च्चितैः ॥ 28
देवो रुद्रावतारस्त्रिभुवन-भवनोत्तम्भनो देव एव
त्यागी देवः प्रमाद्यन्नृपति-

13. नियमने नैगडन्दाम देवः ।
इन्थन्स[28]द्वन्दि-वृन्दैरविरल-विलसच्चाटु-वादं वदद्भि-
र्यस्यास्थान-स्थितानामसममसुहृदां विव्यथे चित्त-वृतिः ।।[29] 29
भरद्वाजो नाम च्युत-कलुष-दोषस्समभ[व]-
द्य ए[क]स्सर्व्वेषामुपशम-धनानामधिपतिः ।
तदीयात्तेजस्तः कृत-कलश-वासाद्यदभव-
त्स वै भारद्वाजस्त्रिभुवन-चमत्कारि-चरित. ।। 30
त्त्रैलोक्यावधि यस्य कीर्ति-लडितं लक्ष्मीश्च वाञ्छावधि-
र्यत्कोपः प्रलयोपपन्न-महिमा शापेन चापेन च ।
व[र्ण्य]म्वा[30] नय-विक्र-
14. सैक-जलधेः किन्तस्य यस्याभव-
ल्लीला-खर्व्वित-[श][31]र्व्व-गरिमा शिष्यस्सुभद्रा-पतिः ।। 31
कोदण्ड-ताण्डवन-पण्डित-वा(बा)हु-दण्ड-
मुद्दण्ड-काण्ड-भर-खण्डित-पाण्डु-सैन्यम् ।
यम्वीक्ष्य[32] विक्षत-विपक्ष-पराजयाश-
स्सत्याद्रितस्स[33] तपसो(ऽ*)पि सुतश्चचाल ।। 32
अथाक्षेपात्तेन द्रुपद-विपदर्थोद्धत-धिया
यदात्तं शापाम्भस्तरलित-कराव(ब)द्ध-चुलुकम् ।
पुमानासीत्तस्मिन्विजय इव साक्षादनु च तं
कुलं चौलूक्यानामनणु-गुण-सीम प्रववृते ।। 33
विभवति च वि[स]र्प्प[त्सौ]र्य[34]-सौन्दर्य-व-
15. र्य-
क्षितिधर-परिपाटी-सूत्त्रिते तत्त्र गोत्त्रे ।
रचित-चटुल-चापाकृष्टि-कृष्टाहित-श्री-
रभवदवनिवर्म्मा विश्व-विख्यात-कर्म्मा ।। 34
पितामहो यत्खलु सिंहवर्म्मा
पिता च यद्वीरवरस्सधन्वः ।
जगत्यतीवातिशयो(ऽ*)मुनैव
महानुभावत्वमतो(ऽ*)पि यत्तु ।। 35
यस्य त्यागस्सकल-जनतापास्त-दारिद्र्य-मुद्रो
वेला-व(ब)न्धु-क्षितिधर-दरी-चारितारि-प्रतापः ।
ईष्टे स्पष्टन्स[35] यदि[36] गणनान्तद्गुणानाम्विधातु-[37]
[38]म्वाचान्धेनुर्ण्णनु[39] भगवती भारती यस्य वश्या ।। 36

रुद्राणीमिव भूभृतां परिवृढो 36
16. लक्ष्मीमिवाम्भोनिधिः
कालिन्दीमिव भास्करस्स भगवान्ज्योत्स्[40]नामिवात्रेस्सुतः ।
वैदेहीमिव जानकः क्रतुविधिः श्री-नोहलेत्यद्भुतं
कन्या नाम ललाम तान्स[41] सुषुवे सामन्त-चिन्तामणिः ॥[42] 37
भर्त्तुः पुलोम-तनयेव मरुद्गणानां
च्छायेव[43] दष्ट-तमसां महसाञ्च पत्युः ।
देवस्य सा रतिरिवेक्षुशरासनस्य
केयूरवर्ष-नृपतेर्द्दयिता व(ब)भूव ॥ 38
देव्या तया मदजल-च्छटयेव दन्ती
वा(बा)ल-प्रवा(बा)ल-लतयेव तटः पयोधेः ।
पुष्प-श्रियेव च तरुस्तडितेव मेघः
शोभां स
17. कामपि व(ब)भार नरेन्द्र-चन्द्रः ॥
निर्म्मापितन्सुकृत-[44]सङ्गतये तयेद- 39
मभ्रङ्कषाग्रशिखर-स्खलितोष्ण-रश्मि ।
देवस्य मन्दिरमुमा-प्रणयैक-व(ब)न्धो-
स्त्यानाकृति स्व-यशसामिथ(व) चक्रवालम् ॥ 40
आकाश-यान-क्रम-खेदिताना-
मह्नोधिनाथस्य तुरङ्गमाणाम् ।
फेणाम्वु(म्बु)भिर्न्नित्य-निषिच्यमाना
मन्ये समुद्वान्ति न यत्पताकाः ॥ 41
विटङ्क-भागेषु वृ(बृ)हत्सु यस्य
वर्षासु तुङ्गामलसारकस्य ।
आश्लेषवत्यो नव-मेघ-मालाः
पारावताली-तुलनाम्वहन्ति[45] ॥ 42
आसीन्माधुम[ते]-
18. यः पवनशिवस्तमनु जयति शव्द(ब्द)शिवः ।
ईश्वरशिवः पुनाति च तस्यान्तेवासितान्सुकृती[46] ॥ 43
तस्मै तपोनिधानाय निपानीयाम्वि(म्बि)पाटकौ ।
दत्तौ विद्या-धनत्वेन ग्रामावग्राम्यया तया ॥ 44
धङ्गटपाटक-पोण्डी-नागव(ब)ला(:*)खैलपाटको वीडा ।
सज्जाहली च दत्ताः स्मरारये गोष्ठपाली च ॥ 45

ख्यातः श्री-युवराजदेव-नृपतेस्तस्यामभूद्भू पतिः
श्रीमल्लक्ष्मणराज ऊर्ज्जित-महाभास्वानिवाभ्युन्नतः ।
भूभृत्तुङ्ग-शिरोभिराङ्घ्रि-रुचयो यत्सेविताः श्री-[श्रि]-
19. [ताः]
कामं यः कमनीय-सुन्दर-गुणैर्न्नव्यैर्ज्जिगाय स्मरम् ।। 46
यस्याहवे दृढ-निपीडित-खड्ग-कोटि-
निर्द्दारितारि-करि-कुंभ-समुद्भवेन ।
वीर-श्रियः क्षिति-तले विततञ्चतुष्कं
मुक्तादलेन ननु कीर्त्तिवधूश्चकार ।। 47
किञ्च ।।
सा कदम्व(म्ब)गुहा मान्या यत्रासीत्सिद्ध-सन्ततिः ।
तस्याः पुनरभूद्वन्द्यो रुद्रशम्भुर्म्मुनीश्वरः ।। 48
तत्त्व-प्रभाव-महनीयतमस्य तस्य
शिष्यो(ऽ*)भवज्जगति मत्तमयूरनाथः[47] ।
निःशेष-कल्मष-मषीमपहृत्य येन
सङ्क्रामित[म्पु?]र- 49
20. महो नृपतेरवन्तेः ।।
तस्मादभूद्भुवन-मण्डनतामवाप्तो
भूपाल-मौलि-मणि-कान्तिभिरर्च्चितांघ्रिः ।
श्री-धर्म्मशम्भुरुचितामल-कान्त-कीर्त्ति- 50
[48]स्सैवागमाम्वु(म्बु)निधि-पारमितस्तपोभिः ।।
अस्मात्सदाशिवः शिष्यस्तपोराशिरभून्नृपैः ।
यत्पाद-द्वयम्वन्द्यमर्च्चितं[49] शेखरांशुभिः ।। 51
अस्मादभून्साधुमतेय[50]-नामा
शिष्यः सुधामा फल-मूल-वृत्तिः ।
तपान्सि[51] तेजान्सि[52] च यत्र वास-
मनन्य-संक्रान्ति-गुणेन चक्रुः ।। 52
अस्माच्चूडाशिवः शिष्यो वंदनीयतमो(ऽ*)भवत् ।
21. कर्म्मजालमलं येन नीतमस्तं मुमुक्षुणा ।। 53
अथ सकल-गुणानामाकरस्तस्य शिष्यो
हृदयशिव-समाह्वो यद्यशो(ऽ*)द्यापि वर्ण्यं(र्ण्यम्) ।
नृप-मुकुट-निविष्टैर्यस्य माणिक्य-चक्रै-
रकृत चरण-मूलं कान्तमेकान्त-वन्द्यम् ।। 54

विद्यानां निलयेन येन सुधिया सत्य-व्रतेनाधिकं
श्रीमन्माधुमतेय-वन्श[53]-वितता कीर्त्तिश्चिरं वर्द्धिता ।
किञ्च क्ष्मा क्षमयाम्वु(म्बु)दः समतया मर्यादयाम्भोनिधि-
र्वैराग्येन[54] जितः स्मरः स भगवान्कस्यास्पदं न [स्तु]तेः ॥ 55

22. किं स्तूयते(ऽ*)सौ मुनि-पुङ्गवो(ऽ*)थवा
श्री-चेदि-चन्द्रो नृपतिः कृतादरः ।
सद्वृत्त-दूत-प्रहितैरुपायनैः
प्रदर्श्य भक्तिम्विधिना[55]निनाय यम् ॥ 56
श्रीमल्लक्ष्मणराजो(ऽ*)पि तस्मै सुतपसे स्वयम् ।
मठं श्री-वेद्यनाथस्य भक्ति-युक्तः समार्प्पयत् ॥ 57
स्वीकृत्यापि मुनिर्भूयो मठं श्री-नौहलेश्वरम् ।
अघोरशिव-शिष्यस्य साधु-वु(वृ)[त्त]स्य दत्तवान् ॥ 58
अथ स विहित-कृत्यश्चेदिनाथः समर्थः
करि-तुरग-समग्रः शक्त-सामन्त-पत्तिः ।
दिशमतिश-

23. य-रम्यां सम्प्रतस्थे प्रतीची-
महित-जनित-भीतिर्दुर्न्निवार-प्रचारः ॥ 59
समर-कृत-विकारान्विक्रमेण प्रहत्य
प्रणत-नृपति-दत्तोपायनैर्वर्द्धिताज्ञः ।
हृदय-निहित-वृत्तैरर्थिनां पूरिताशो
जलनिधि-जल-खेलं सैन्य-चक्रं चकार ॥ 60
निमज्य यो रत्न-निधौ श्रीमान्सोमेश्वरं शनैः ।
अभ्यर्च्चर्य काञ्चनैः पद्मैर[था][56]न्यत्तु न्यवेदयत् ॥ 61
जित्वा कोसल-नाथमोड्र-नृपतेराप्तस्तु यः कालियो
रत्न-स्वर्ण्ण-मयः स येन वि[हि]-

24. तस्सोमेश्वराभ्यर्च्चनम् ।
दत्वा[57] यः करि-वाजि-शुभ्र-वश(स)न-स्रक्चन्दनादीन्पुनः
सन्सार[58]-श्रम-शान्तये(ऽ*)ति- विनतस्तुष्टाव तुष्टः प्रभुः ॥ 62
असारं सन्सारं[59] य इह मनुते को(ऽ*)पि नृ[प]ति-[60]
स्तदंघ्रि-व्यानत्या विगलिततमास्तत्व(त्त्व)-निरतः ।
न तस्य श्रीर्भूयो विकृ[ति][61]-कृतये जन्म-विरहा-
दिति ध्यानाविष्टः शिव-महसि चित्तं विहितवान् ॥ 63

श्री-शङ्करगणस्तस्मादभूद्भूमीश्वरो महान् ।
यत्पाद-द्वन्द्वमद्वंद्वं द्विषद्भिरपि सेवितम् ॥ 64
संख्ये (ऽ*) संख्य-विपक्ष-

25. पक्ष-दलन-व्यासङ्गि-खड्ग-व्रतं
यस्यासीद्दृढ-साहसस्य सततन्दानं जनानन्दकृत् ।
रूपेणाप्रतिमो मनोभव-भवं दर्प्पं जहारोद्धतं
यः सर्व्वत्र च सर्व्वकालमवनीनाथः स्तुतः कोविदैः ॥ 65
यत्पाद-द्वय-पद्म-सद्म विततं भूतेरभूद्भूषितं
भूपानां नमतां किरीट-विकट-प्रान्तस्थ-रत्नांशुभिः ।
वक्षो-रत्न-निधिन्समाश्रितवती[62] लक्ष्मीः क्रमेणागता
वीर-श्रीरपरैव यस्य नृपतेः कौक्षेय-धाराश्रया ॥ 66
तस्य श्री-युवराजदेव-नृ-

26. पतिर्भ्राता कनीयानभू-
द्भूपैर्यच्चरणारविंद-पतितैर्भृङ्गैरिवा[ङ्ग]-स्थितम् ।
यः सत्य-व्रत-सत्व-[63]सूक्ति-वसतिः श्री-विक्रमैकाश्रयः
प्रायस्तस्य न सज्जनो(ऽ*)पि सकलान्वक्तुं गुणान्शक्ष्यति[64] ॥ 67
दंष्ट्रा-कोटि-विपाटनोग्र-वदनः क्रूर-[65]स्वरो भासुरो
ने[त्र]-[66]प्रान्त-विकीर्ण्ण-कोप-रुधिरः पाद-प्रचारायुधः ।
येनाक्रम्य भुजेन भूमि-पतिना लाङ्गूल-व(ब)द्ध-क्रमो
दैत्यो व्याघ्र-वपुर्हतो(ऽ*)तिभयदः शस्त्री-भृता पाणिना ॥ 68
कन्दर्प्पो(ऽ*)भिनवः पुर-

27. न्ध्रि-नयन-प्रीति-प्रदो(ऽ*)प्यन्यथा
यः कालः करवाल-कोटि-विहत-स्थूलेभ-कुम्भ-स्थलः ।
चित्रं यच्च सरस्वती-कृत-रतिः श्रीकण्ठ-पूजापर-
श्चातुर्व्वर्ण्य-विचार-चारु-चतुरो यच्चार्थि-चिन्तामणिः ॥ 69
यस्योतुङ्ग-[67]गजेन्द्र-मज्जन-गलद्दानाम्वु(म्बु)भिर्म्मिश्रितं
रेवा-वारि विविक्त-तिक्तमुचित-स्नानेन तन्वीजनः ।
संप्राप्योरु-नितम्व(म्ब)-ताडन-वश-व्यस्तास्त-वीची-चयं
स-[द्वं द्वं] सम-सौरभेण महता निर्व्याजमायोजितः ॥ 70
रामाणां कु-

28. च-मण्डलेषु नियतं हार-प्रकार-क्रमा-
त्संपूर्ण्णे शशि-मण्डले च विमले ज्योत्स्ना-च्छलेनोज्वलम्[68] ।

[म]न्ये[69] मानस-वारि यस्य वितते हन्सावली[70]-विभ्रमा-
द्भ्रान्ताशेषमुमापतेस्तु वसतौ विश्रान्तिमागाद्यशः ॥ 71
संपूज्य देवमीशानम्विभवैः[71] स्वैर्यथोचितैः ।
यथागमं यथाशास्त्रं स्तोस्त्रम्विहितवान्नृपः[72] ॥ 72
अविचलित-मनोभिर्यैस्त्वमीश क्षितीशै-
र्व्विभव-विहित-कृत्यैरिज्यसे ते कृतार्थाः ।
य इह कृ[त-वि]·

29. कारा मन्मथैकान्त-चिता[73]
भवति वरद तेषां संपदुन्माद-हेतुः ॥ 73
स-मद-करि-घटाभिः किं किमङ्गाङ्गनाभि-
र्म्मदन-शयन-लीलां भावयन्तीभिराभिः ।
कनक-तुरग-वासो-रत्न-जातैर्न्न कृत्यं
न हि भवति भवानी-वल्लभस्यार्च्चनं चेत् ॥ 74
भवति नृपति-वन्शे[74] जन्म पृथ्वी च भोग्या
श्रुतमुचित-विचारश्चारु-रूप-प्रभावः ।
समर-विजय-संपत्तस्य यो निःप्रपञ्च-[75]
ञ्चरण-युगल-मूलं संश्रितः शङ्करस्य ॥ 75
[किमिह]

30. व(ब)हुभिरुक्तैर्न्नाथ सर्व्वस्य हेतु-
र्भवतु भवति नित्यं भक्ति-योगो ममैकः ।
सकल-सुख-विशेषाद्यत्र पीयूष-वर्षः
स्वयमनुभव-गम्यो जायते त्वत्प्रसादात् ॥ 76
भूप-त्रय-यशोराशि-वर्ण्णनं प्रथमं कृतम् ।
श्रीमता श्रीनिवासेन श्री-स्थिरानन्द-सूनुना ॥ 77
भूपतीनां त्रयाणां तु कीर्त्ति-कीर्त्तनमुज्वलम्[76] ।
विहितं [स]ज्जनेनाथ सुधिया थीर-सूनुना ॥ 78
पत्तन-मण्ड[पि]कायां ॥
लवण[स्य] [खण्डिकायां षो]-

31. [ड]सिका[77] घाणके च [षोड][78] षोडसिका ।
तैलस्य मासि मासे दिनमनु च यु[गा]युगे च पौरस्तु ॥ 79
पूगफल-मरिच-शुण्ठी-प्रभृतिषु भाण्डेषु भ[र]क-पौरस्तु ।
वीथीं प्रति च कपर्द्दीं(र्द्दी) द्यूत-क[प[79]]र्द्दस्तु शाक-वार्ताकम् ॥ 80

रस-वणिजामादायस्तृण-पूलक-धी[र्म]रादि यत्किञ्चित् ।
दत्ते करी(रि)-चतुष्टयमङ्ग तुरङ्गो(ङ्ग)-द्वयन्तु पौराणाम् ॥ 81
यद्वहद[न्य]द्दानं किमपि च विद्या-धनन्तदुद्दिष्टम् ।
य[त्व][80]···दः [पुण्य-श्री]-

32. [की]र्त्तयः प्रवर्त्तन्ते ॥ 82
यत्व च श्री-नोहलेश्वर-मठे श्रीमदघोरशिवा[चा]र्यो(ऽ*)भूत् ॥
क्वचिद्भि[क्षा-वृ]त्तिः क्वचिदपि च शाकाभ्यवहृतिः
क्वचिन्मूलाहारो क्वचिदपि च कंदांश्च वु(बु)भुजे ।
परं ज्योतिः शैवं विगलित-रजस्कान्ध-तमसं
